
# पृथिवीवल्लभम्

मूलकथा—लेखक : श्री. कन्हैयालाल मुनशी



# पृथिवीवल्लभम् ।

श्रीमद्भिः कन्हैयालालमुनशीमहोदयैः विरचिता
गुर्जरकथा
लिमयेकुलोद्भवेन काशीनाथतनयेन बालकृष्णेन
संस्कृतनाटके परिवर्तिता ।

# PRITHIVI-VALLABHAM

A SANSKRIT DRAMA

**Acts I to V**

*by* **B. K. Limaye**

***Based on the immortal Gujarati Novel***
***'Prithivivallabh'***

*by* **Dr. K. M. Munshi**

**BHARATIYA VIDYA BHAVAN**
**CHOWPATTY : BOMBAY-7**

Copyright and rights of performance wholly or in part of, or use of any extracts from, 'पृथिवीवल्लभम्' strictly reserved by the Publishers.

**First Edition : Copies 1100**

*December 1962*

Certificate of Suitability issued by the Stage Performances Scrutiny Board.

No. of the certificate — DRM 875/62.

**Price Rs. 2-00**

---

*Printed by :* J. D. Desai at Rashtra Vaibhav Press, V. P. Road, Girgaum, Bombay 4.

*Published by :* Shri S. Ramakrishnan, Executive Secretary, Bharatiya Vidya Bhavan, Bombay 7.

# PREFACE

This book owes its origin to two things, viz. the famous Gujarati novel 'Prithivivallabh' by Dr. K. M. Munshi and the Sanskrit dramas staged by the Brahman Sabha of Bombay. Ever since I read the said novel in 1944, I often felt that with its well-knit plot, subtle characterization and the conflict of ideologies therein it would furnish an excellent plot for a drama. Then the series of Sanskrit dramas staged by the Brahman Sabha since 1952 aroused in me a desire to write a Sanskrit play and among the stories that I considered suitable therefor, that of "Prithivivallabh" was the foremost. That is how, in brief, I came to write this play.

But this work is the result of a combined effort of many and I am very thankful to all those who have gladly co-operated with me. I am particularly obliged to Dr. K. M. Munshi, but for whose patronage it would not have seen the light of the day. I must also thank Shri Daji Bhatawadekar and Shri Rambhau Bapat for their valuable suggestions from the view-point of stage, Sarvashri M. S. Pendharkar, Gajananshastri Ranade and Vamanshastri Bhagwat for having solved my difficulties regarding grammar and usage, Shri P. P. Joshi for his untiring efforts and active co-operation from beginning to end, my son Shrirang and the Brahman Sabha workers, viz. Sarvashri Dada Khire, D. V. Vaidya, Mahadeobhai Godbole, N. Natekar and others for preparing copies etc., as well as Sarvashri S. Ramakrishnan and S. G. Tolat of the Bharatiya Vidya Bhavan for their kind co-operation and valuable suggestions, the

Rashtra Vaibhav Press for doing the printing work so nicely and in so short a time, and lastly all the artistes and back stage workers and many others who have taken pains for its presentation on the stage.

Readers will notice that I have tried to make this book as easy as possible for the common reader. For this purpose I have used all punctuation marks, split almost all sandhis and avoided long compounds and have also attached a glossary at the end. I shall be very glad if this book does something towards allaying the somewhat groundless fear of Sanskrit entertained by the public and acquainting all the Sanskrit-knowing people in India and abroad with the beauty of 'Prithivi-vallabh'. It should also be noted that all the verses in this play are composed by me except the one beginning with "लक्ष्मीर्यास्यति–". Readers are requested to see the errata on page 70 and make necessary corrections in the text before reading the book.

I am exceedingly happy to dedicate this first composition of mine to Dr. K. M. Munshi on the occasion of his 75th birth-day, about whose patronage I can only say—

बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥

*Bombay :*
*20th December 1962*

B. K. LIMAYE

# सादर-समर्पणम् ।


मूलकथा-लेखकः



श्रीमन्तः मुनशीमहोदयाः

संस्थापितं भारतवर्षविद्या-
संवर्धनार्थं भवनं विशालम् ।
अनुष्ठिता यैर्महती च पूजा
वाग्देवताया विविधप्रसूनैः ॥१॥

संस्कृत-नाटक-लेखकः



लिमये-बालकृष्णः

विख्यातयाऽहं कथया च येषां
प्रवर्तितो नाटकलेखनेऽस्मिन् ।
तेभ्यः क्रियैषा परमादरेण
समर्प्यते मुन्शिमहोदयेभ्यः ॥२॥

# FOREWORD

'Prithvi Vallabh' is the product of a yearning heart, and so it is living. From the point of view of art, many critics consider it better than my other novels.

'Prithvi Vallabh', the most typical of my historical romances, has earned more praise and more condemnation than all my other novels and has had the largest audience of them all. Apart from quite a few editions in Gujarati, it has gone into Hindi, Marathi, Bengali, Tamil and Kannada. It has also gone on the Gujarati stage – both professional as well as amateur. When presented as a movie by Sohrab Mody, it was a great success.

The Brahman Sabha of Bombay has been rendering yeomen service in staging the classic Sanskrit dramas of old masters like Kalidasa, Bhavabhooti and Shudraka. On the occasion of the Silver Jubilee of the Bhavan, they are now presenting the Sanskrit version of 'Prithvi Vallabh', which has been ably rendered by Shri Balkrishna K. Limaye and directed by Shri Dajee Bhatawadekar, the well–known and talented artiste of the Sanskrit and Marathi stages.

I wish their endeavour all success.

Bharatiya Vidya Bhavan,
Curzon Road, New Delhi.
22nd November 1962.

**K. M. Munshi**

## SYNOPSIS OF THE PLAY

Munja, Emperor of Malava, an epicurean, defeated Tailapa, Emperor of Tailangana, repeatedly for sixteen times. In the 17th battle, however, thanks to the valour of Bhillama, a tributary prince, Tailapa triumphed over Munja, took him a captive and imprisoned him in a cellar.

Mrinalavati, the widowed elder sister of Tailapa, who was a stoic and the de facto ruler of Tailangana, decided to vanquish Munja on the psychological front also and made several fruitless attempts to that end. She even visited him in the cellar and tried to make him aware of his wretched condition and to teach him the right way of living, but all in vain. On returning home she passed a restless night during which she underwent a complete metamorphosis and found herself to have been enamoured of Munja. She then paid him further visits, but only as his beloved.

Now Bhillama, asked by Tailapa to choose anything as a reward for his services on the battle-field, prayed for and secured the release of Munja's poets and gave them shelter in his house. Bhillama's daughter Vilasavati, who was already betrothed to Akalankacharita the crown-prince of Tailangana, soon fell in love with Rasanidhi one of the poets who in fact was none but Bhoja the nephew of Munja. Bhillama's wife Laxmi, who was dissatisfied with the subordinate position to which she was reduced there, disclosed to Rasanidhi two secret underground passages, whereupon Rasanidhi laid a plot to release Munja and escape with him to Avanti.



Munja, however, refused to accompany Bhoja immediately as he would like to take Mrinalavati with him. He then proposed to Mrinalavati to accompany him to Avanti. Now Mrinalavati was in a fix as to whether she should go to Avanti or not. She wanted Munja's company, but was not prepared to part with power. She ultimately decided to foil Munja's attempt to escape and entrusted Akalankacharita with that work.

Foiled in his attempt to release Munja, Bhoja ran away with Vilasavati by a subterranean passage, but was closely chased by Akalanka charita. In the duel that ensued, Akalankacharita was defeated by Bhoja but was released on the condition of returning quietly. But while returning, taking advantage of darkness, he cut off the head of Vilasavati who was lying unconscious and carried it with him.

This resulted in the outburst of Laxmi's wrath, Bhillama's revolt against Tailapa and escape from Tailangana, in the exposition of Mrinalavati's love-affair with Munja and her consequent degradation and loss of power. Finally, as per Tailapa's order, Munja was publicly put to death by being trampled under the foot of an infuriated elephant.

## पृथिवीवल्लभ-नाटक-पात्र-सूची।

[ श्रीमतां कन्हैयालाल-मुनशी-महोदयानाम् अमृतमहोत्सवस्य तथा च भारतीय-विद्या-भवनस्य रौप्यमहोत्सवस्य अवसरे मोहमयीस्थित-ब्राह्मण-सभाकृते प्रथमप्रयोगे कृताभिनयानां नटानां नामावल्या समन्विता । ]

| | | | | |
|---|---|---|---|---|
| १. तैलपः | — | तैलङ्गणाधिपतिः | — | श्री. सीताराम डोङ्गरे |
| २. मृणालवती | — | तैलपस्य स्वसा | — | कु. पुष्पा नारगोलकर |
| ३. जक्कला | — | तैलपस्य महिषी | — | सौ सुशीला करन्दीकर |
| ४. अकलङ्कचरितः | — | तैलपस्य सुतः | — | श्री. प्रभाकर गोखले |
| ५. भिल्लमः | — | तैलपस्य महासामन्तः | — | श्री. राम बापट |
| ६. लक्ष्मीः | — | भिल्लमस्य पत्नी | — | सौ. चारुशीला भाटवडेकर |
| ७. विलासवती | — | भिल्लमस्य सुता | — | कु. आशा फडके |
| ८. मुञ्जः | — | मालवाधिपतिः | — | श्री. दाजी भाटवडेकर |
| ९. रसनिधिः (भोजः) | — | मुञ्जस्य भ्रातृपुत्रः | — | श्री. रङ्गनाथ देवधर |
| १०. धनञ्जयः | — | मालवकविः | — | श्री. त्र्यम्बकराव गोखले |
| ११. पद्मगुप्तः | — | मालवकविः | — | श्री. रामभाऊ दामले |
| १२. सूत्रधारः | | | — | श्री. श्रीकृष्ण टिकेकर |
| १३. माधवः | — | पारिपार्श्वकः | — | श्री. बाळ करन्दीकर |
| १४. त्यागानन्दः | — | तैलपस्य सेवकः | — | श्री. वामनराव अभ्यङ्कर |
| १५. शशाङ्कः | — | भिल्लमस्य सेवकः | — | श्री. दत्तोपन्त वैद्य |
| १६. रणमल्लः | — | भूमिगृहरक्षकः | — | श्री. राजाभाऊ गोरे |
| १७. सामन्तः | — | तैलपस्य सामन्तः | — | श्री. अच्युत फडके |

तथा च चारणः नागरिकौ सैनिकौ च ।

---

अथ

# पृथिवीवल्लभम् ।

## प्रथमः अङ्कः ।

सृष्टेरन्तकरोऽपि यः सकरुणः शान्तः क्रतुध्वंस्यपि
तुल्यः सन्नपि विष्णुना भजति यो रामं तदंशोद्भवम् ।
सुन्दर्या यतिवेषधार्यपि वृतो यः शैलराट्कन्यया
रत्यां दग्धरतिप्रियोऽपि चतुरः शं वः क्रियाच्छङ्करः ॥ १ ॥

[ नान्द्यन्ते ]

**सूत्रधारः**—भवतु । माधव, इतस्तावत् ।

**पारिपार्श्वकः**—( प्रविश्य ) आर्य, अयमस्मि । को नाम भवदादेशः ?

**सूत्रधारः**—माधव, जानासि एव यथा भारतकविकुलललामभूताः श्रीमन्तः कन्हय्यालालमुनशीमहोदयाः साम्प्रतं पादोनशतवर्षीयाः सञ्जाताः । तथा च तैः संस्थापित भारतीयविद्याभवनमपि शतपादवर्षीयं जातम् । अतः अत्र मोहमयीनगर्यां महानुत्सवः प्रस्तुतोऽस्ति । अस्मिन् अवसरे मोहमयीस्थितब्राह्मणसभासूचनानुसारेण कविना बालकृष्णेन विरचितस्य मुनशीमहोदयविरचितकथाधिष्ठितवस्तुनः पृथिवीवल्लभाख्यस्य नाटकस्य प्रयोगं कर्तुमुद्यतोऽहम् । तत्र च मया त्वत्तः सोत्साहं सहकार्यमपेक्ष्यते ।

**पारिपार्श्वकः**—सानन्दं करिष्यामि । किन्तु, किञ्चित् प्रष्टुमिच्छामि ।

**सूत्रधारः**—विश्रब्धं प्रष्टुमर्हसि ।

**पारिपार्श्वकः**—कोऽयं पृथिवीवल्लभो नाम ?

**सूत्रधारः**—श्रूयताम् ।

सम्राडुत्तरभारतस्य रविणा चण्डप्रतापे समः
साक्षाद् देवगुरुः श्रुते विधुसमो नानाकलासम्पदि ।
सौन्दर्ये मदनोपमो विजितवांश्चेतांसि सम्पश्यतां
मुञ्जः पार्थिवकुञ्जरः पृथुयशःपुञ्जो व्यराजत् पुरा ॥ २ ॥

त्यागानन्दः—( प्रविश्य ) अलमेतेन कोलाहलेन ।

सूत्रधारः—किमेष ते कोलाहलः प्रतिभाति ? अरसिक इव लक्ष्यसे ।

त्यागानन्दः—आर्य, नाहम् अरसिकः । परं तैलपराजसेवकत्वात् न केवलं रसिकतां व्यञ्जयितुम् असमर्थोऽस्मि किन्तु रसिकविरोधोऽपि मे कर्तव्यतां गतोऽस्ति । आर्य, कथं न जानाति भवान् यदस्मिन् राज्ये सङ्गीतादि-ललितकलानां सेवनं प्रतिषिद्धमस्ति ? सम्प्रति सर्वाधिकारसम्पन्ना तैलपराज-भगिनी तैलङ्गणमाता आर्या मृणालवती देवदर्शनार्थे प्रासादात् निष्क्रामति । यदि भवतो गीतं तस्याः श्रुतिपथमाप्नुयात् तदा नूनं महान् अनर्थः स्यात् ।

सूत्रधारः—भद्र, अनुगृहीतोऽस्मि त्वया सूचनादानेन । तत् साधयामो वयम् । [ सर्वे निष्क्रान्ताः । ]

इति प्रस्तावना ।

## प्रथमः प्रवेशः ।

स्थलम्—मान्यखेटनगरे राजप्रासादनिकटवर्ति शिवमन्दिरम् ।

समयः—प्रथमः दिवसः । प्रभातकालः ।

[ ततः प्रविशति वल्कलधारिणी विलासवती भूमितले उपविष्टा । ]

विलासवती—हा धिक् हा धिक् । सर्वथा निष्फलो भाति मे समुद्यमोऽयम् । कथमात्मनो मनः निष्कलङ्कं कर्तुं सुचिरं प्रयतमानायाः मे नैव सिद्धिलेशोऽपि हस्ताभ्याशमायाति ?

**घृष्टं दमशिलाखण्डे मृष्टं वैराग्यवारिणा ।**
**अद्यापि मे मनोवस्त्रं निष्कलङ्कं न जायते ॥ ३ ॥**
**त्यक्तं सुखं विषयजं मनसो विशुद्ध्यै**
**सोढा मनोनियमनोत्थितयातनाश्च ।**
**स्वान्ते मुहुस्तु समुदेति सुखाभिलाषा**
**त्यक्ताशनस्य जठरे क्षुदिव प्रवृद्धा ॥ ४ ॥**

अनेन खलु उभयत्रापि मे हानिः । नहि सुखमपि भुज्यते न वा शुद्धिरपि साध्यते । इतो भ्रष्टा ततो भ्रष्टा इत्येव जाताऽस्ति मे दशा । [ नेपथ्यात् ' इत आर्या ' इति शब्दः श्रूयते । ] अविहा, मृणालमाता एव समागता स्यात् । तदिदानीं ध्यानमेव कर्तुमुचितम् । ( पद्मासनं कृत्वा अञ्जलिं बद्ध्वा नेत्रे च निमील्य )



**कामक्रोधप्रभृतिरिपवः सम्प्रमथ्नन्ति नित्यं**
**तेषां घातैः क्षतमतितरां जातखेदं वपुर्मे ।**
**शम्भो त्वं चेदवसि नहि मां दुर्बलां मन्दबुद्धिम्**
**अन्यं त्वत्तः कमिह शरणं यामि कामान्तकारिन् ॥ ५ ॥**

[ ध्यानस्था एव तिष्ठति । ततः प्रविशति मृणालवती जक्कलादेव्या लक्ष्मीदेव्या च अनुगता । ]

मृणालवती—( लक्ष्मीं प्रति ) अपि ज्ञायते अधुना सत्यता मे वचनस्य ? दृढनिश्चयः खलु किं न साधयितुं समर्थः ?

**इन्द्रियाणां नियमने वृद्धा एव क्षमा इति ।**
**पामरा एव जल्पन्ति लुब्ध्यन्तो भोगकर्दमे ॥ ६ ॥**

लक्ष्मि, विलासवत्याः योगसाधनाविषये साशङ्कमिव आसीत् ते मनः । अपि साम्प्रतं नष्टा ते शङ्का ?

लक्ष्मीः—आर्ये, क्षन्तुमर्हसि माम् । सर्वथा विनष्टा मे शङ्का ।

मृणालवती—पश्य, अनेन आवयोः संवादेन न लेशमात्रमपि विचलिता इयम् । साधु विलासवति, साधु ।

लक्ष्मीः—भवत्याः अनुग्रहस्यैव फलमेतत् । अपि नाम साम्प्रतम् अनुरूपा इयं कुमारस्य अकलङ्कचरितस्य ?

मृणालवती—( सकौतुकम् ) सर्वथा अनुरूपा एव । ( विलासवतीम् उपेत्य ) वत्से विलासवति । ( तां हस्तेन स्पृष्ट्वा ) वत्से विलासवति—

विलासवती—( समाधिभङ्गं नाटयित्वा ससम्भ्रमम् ) कथमार्या मृणालमाता ? ( सरभसमुत्थाय प्रणम्य च ) अम्ब, अभिवादये ।

मृणालवती—वत्से, चिरं जीव । सर्वथा निष्कलङ्का भव । तैलङ्गणयशोवर्धिनी च भव । भवतु, इदानीं भगवन्तं चन्द्रशेखरं वन्दामहे । विलावसति, गीयतां नित्यं प्रार्थनापरं श्लोकद्वयम् । [ सर्वाः बद्धाञ्जलयः तिष्ठन्ति । ]

**विलासवती**—कामक्रोधादिनिर्मुक्तं त्वच्चिन्तनपरायणम् ।
निर्मलं कुरु मे चित्तं कामान्तक शिव प्रभो ॥ ७ ॥
विजयं देहि साधुभ्यः पापिभ्यश्च पराजयम् ।
दुःखेभ्यो दुरितेभ्यश्च संसारं त्राहि शङ्कर ॥ ८ ॥

**मृणालवती**—भवतु । विलासवति, अधुना मन्दिरद्वारि उपविश्यताम्, यदि च कश्चिद् आगच्छन् दृश्यते तदा दीयतां मे तस्य सूचना । [ विलासवती निष्क्रान्ता । ततो नन्दिसमीपं गत्वा ] जक्कले,

**जक्कला**— ( समीपमागत्य ) किं मातः ?

**मृणालवती**—( मन्दस्वरेण ) इदं तत् स्थानं यदन्तरेण प्रोक्ताऽसि मया । अस्य नन्दिनः उदरे सुरङ्गामार्गः प्रारभ्यते ।

**जक्कला**—( साश्चर्यम् ) एवम् ? क्व च गतोऽस्ति सः सुरङ्गामार्गः ?

**मृणालवती**—नगराद् बहिः स्थितं भुवनेश्वरमन्दिरं गतोऽस्ति । विपत्काले अनेनैव नगरात् निर्गन्तुं शक्यम् ।

**लक्ष्मीः**—मातः, अपि ज्ञायते काचिद् युद्धवार्ता ?

**मृणालवती**—( सरोषम् ) लक्ष्मि, यदि किञ्चिद् अज्ञास्यम्, तदा किं न तद् अकथयिष्यम् ?

**जक्कला**—मातः, अपि नाम अस्मिन् युद्धे अस्माभिः विजयः प्राप्स्यते ?

**मृणालवती**—किमिति न प्राप्स्यते ? जक्कले, जानासि एव यतो धर्मस्ततो जयः इति । सुनिश्चितं ज्ञायतां यद् अद्य वा श्वो वा अन्तिमो विजयः अस्माकमेव ।

जयन्तु नृत्यन्तु हसन्तु वाऽपि पापाः पुमांसः प्रथमं प्रकामम् ।
अन्ते तु तेषां नियमेन भावी पराजयः पुण्यपराङ्मुखानाम् ॥ ९ ॥

**जक्कला**—मुञ्जस्तु अत्यन्तविक्रान्तः इति श्रूयते ।

**मृणालवती**—अत्यन्तविक्रान्तः ?

भवेदत्यन्तविक्रान्तो रणे मानवयोद्धृषु ।
कामादीनां विकाराणां किन्तु किङ्कर एव सः ॥ १० ॥

जक्कले, मानवविजयाद् आत्मविजयः श्रेयान् । प्रथमो हि रावणजरा-



सन्धादिभिः दुरात्मभिरपि सम्पादयितुं शक्यः, द्वितीयस्तु रामचन्द्रादिभिः शुद्धचरितैरेव । अत एव केवलं मानवविजयं सम्पादयन् मालवपतिः मुञ्जः न मे आदरस्य किन्तु तिरस्कारस्यैव विषयः ।

**विलासवती**—( प्रविश्य ) मातः,

**मृणालवती**—किम् ?

**विलासवती**—तातः आगतः ।

**मृणालवती**—( सविस्मयम् ) कथं महासामन्तः ?

[ लक्ष्मीदेवी भीता चिन्ताक्रान्ता च दृश्यते । जक्कलाऽपि सभयं भित्तिमवलम्बते । ततः प्रविशति वर्मधारी पट्टिकाबद्धशीर्षः च भिल्लमः । ]

**भिल्लमः**—दिष्ट्या वर्धते अत्रभवती भ्रातुर्विजयेन ।

**जक्कला**—( अत्यानन्दं नाटयित्वा ) सत्यमेव ? ( सभयं मृणालवतीम् ईक्षते । )

**मृणालवती**—साधु साधु । यतो धर्मस्ततो जयः इति वचनम् अवितथमेव । भिल्लमराज, कदा खलु सम्पादितः एष विजयः ?

**भिल्लमः**—परश्वः एव । गोदावरीम् उल्लङ्घ्य कृताभियानो मुञ्जराजः तैलङ्गणसेनया भीषणरणान्ते पराजयं प्रापितः ।

**मृणालवती** –अथ का स्थितिः तस्य सेनायाः ?

**भिल्लमः**—प्रायेण सर्वा एव बन्दिग्राहं गृहीता । अत्यल्पा एव पलायितुम् अपारयत् ।

**जक्कला**—कच्चित् कुशली आर्यपुत्रः ?

**मृणालवती**—( सरोषम् ) जक्कले, असदृशः तवायम् औत्सुक्यातिशयः । भवतु, भिल्लमराज, का वार्ता तस्य नरपिशाचस्य ?

**भिल्लमः**—कस्य ? मुञ्जस्य ?

**मृणालवती**—अथ किम् ।

**भिल्लमः**—सोऽपि मया दारुणयुद्धान्ते बन्दीकृतः । प्रेषितश्च अहं तैलपमहाराजेन अद्य विजययात्रा आयास्यति इति सन्देशहरणाय ।

**मृणालवती**—तदिदानीं यात्रासिद्धतार्थम् आदेशाः देयाः । तत् चलतु महासामन्तः ।

**भिल्लमः**—मातः, अचिरादेव आगच्छामि।

**मृणालवती**—भिल्लमराज, कथमद्यापि अपरिवर्तितमेव भवतो मनः? कदा नु तत् सात्त्विकतां प्राप्स्यति? (भिल्लमो हसति।) भवतु। जक्कले, विलासवति, साधयामो वयम्।

**भिल्लमः**—मातः, विलासवतीम् अचिरेणैव प्रेषयामि।

**मृणालवती**—भिल्लमराज, युवां पितरौ एव प्रदूषयथः इमां तपस्विनीं बालाम्। तत् कथमसौ निष्कलङ्का भवेत्? भवतु। विलासवति, शीघ्रमेव आगम्यताम्। [जक्कलया सह निष्क्रान्ता।]

**लक्ष्मीः**—कच्चित् कुशलम् आर्यपुत्रस्य?

**भिल्लमः**—अथ किम्। कामं सन्ति एव कानिचित् क्षतानि। तथापि महान् खलु विजयो मया सम्पादितः। यदि अहं तत्र न अभविष्यम्, तदा न केवलं न मुञ्जराजः अग्रहीष्यत किन्तु तैलपराजस्य प्राणाः अपि संशये अपतिष्यन्।

**लक्ष्मीः**—एवम्?

**भिल्लमः**—अथ किम्। मुञ्जतैलपयोः अतिभीषणं खलु युद्धमभूत्।

**लक्ष्मीः**—किं द्वन्द्वयुद्धम् अभूत्?

**भिल्लमः**—बाढम्। प्रथमं तावद् उभावपि गजारूढौ आस्ताम्, किन्तु हतयोः महामात्रयोः तौ भुवमवतीर्य द्वन्द्वयुद्धमारब्धौ।

**लक्ष्मीः**—ततस्ततः?

**भिल्लमः**—ततः किम्? क्व मुञ्जः क्व च तैलपः? अचिरादेव मुञ्जकृतैः अनेकप्रहारैः जर्जरीभूतशरीरः पतनोन्मुखश्च आभात् महाराजः। तदा तत्साहाय्यार्थं पुरःसृत्य अहमेव मुञ्जेन योद्धुमारभे। अहो दारुणम् अभूद् आवयोः द्वन्द्वयुद्धम्। मुञ्जभिल्लमयोर्युद्धं मुञ्जभिल्लमयोरिव। उभौ अपि विजयाय कृतनिश्चयौ स्वस्वस्थाने स्थिरपदौ क्षणमात्रमपि च पराजयं स्वीकर्तुमनुद्यतौ आस्व। हन्त सकलं त्रिभुवनमेव विलोकनपरम् आसीत्। ममापि नाम कठिनतमाऽऽसीत् सा परीक्षा। अन्ते तु त्वया लक्ष्म्या इव विजयलक्ष्म्या अपि कृतो मयि प्रसादः। मुञ्जो हि किञ्चित् स्खलितपदः अभवत् अहं च तं सरभसम् अभिपत्य निगृहीतवान्।



**भिल्लमः**—मुञ्जभिल्लमयोर्युद्धं मुञ्जभिल्लमयोरिव। (पृष्ठम् ६)

**लक्ष्मीः**—साधु । आर्यपुत्र, साधु ।

**विलासवती**—तात, कीदृशः खलु सः मुञ्जः ?

**भिल्लमः**—जाते, अद्य द्रक्ष्यसि एव तं साक्षात् । असाधारणः खलु असौ वीरः । मया निगृहीतमात्रेणैव तेन सकौतुकं मे पृष्ठं परामृष्टम् उक्तं च 'भिल्लमराज, धन्योऽसि । निखिलभुवनतले त्वमेव कर्तुमेतत् समर्थः' इति ।

**लक्ष्मीः**—साधु साधु । अभिजातवीरः एव वीरान्तरगुणवर्णनं कर्तुमलम् ।

**भिल्लमः**—ततस्तेन अहं विज्ञापितः–'भिल्लमराज, मम तावत् काऽपि गतिर्भवतु, मम कवयस्तु भवता रक्षणीयाः' इति ।

**लक्ष्मीः**—अहो कविप्रियता रसिकता च मालवपतेः !

**विलासवती**—तात, कथं पुनरहं द्रष्टुं शक्ष्यामि मुञ्जराजम् ?

**भिल्लमः**—कः खलु तत्र अन्तरायः ?

**लक्ष्मीः**—नाथ, नित्यं राजनीतिनिरतेन भवता कथं ज्ञास्यते दुःखमावयोः ? अहो लघुत्वम् आपन्ने स्वः ! राज्ञी जक्कलाऽपि न स्वातन्त्र्यम् अनुभवति, का तर्हि मे कथा ? ( पटान्तेन अश्रूणि प्रमार्ष्टि । ) न पुनर् आत्मनो दुःखं मां तथा पीडयति । समाप्तप्रायं हि मे जीवनम् । किन्तु अस्याः अस्फुटकलिकानिभायाः विलासवत्याः दुःसहमेव दुःखम् ।

**भिल्लमः**—देवि, ननु ज्ञायते एव त्वया किमर्थम् अस्माभिः पराधीनत्वमेतत् सह्यते इति ।

**लक्ष्मीः**—जानामि, जानामि तत् सर्वम् । न पुनर् इतःपरं सोढुं शक्नोमि दुरवस्थामिमाम् । यदि भवादृशस्य अतुलवीरस्य सेवावृत्तिः अपरिहार्या एव, तदा मुञ्जसदृशः कश्चिद् रसिकवरः सम्राट् सेव्यतां न तु एषा प्रभुत्वगर्विता सन्न्यासिनी ।

**भिल्लमः**—देवि, समाश्वसिहि, धैर्यमवलम्बस्व । किमेवं मन्यसे यत् त्वां पीडयन्ती इयं दुरवस्था मां न व्याकुलयति इति ? ( सशोकम् ) हा निराधाराः मे प्रजाः । त्वं तावद् राजदुहिताऽसि ।

**लक्ष्मीः**—नाथ, किम् आत्महेतोः दुःखिताऽस्मि ?

**भिल्लम** —नैव। देवि, जानामि तत् सर्वम्। अहं स्वयमेव निराधारः तैलपयशोवर्धने नियुक्तः किङ्करो जातोऽस्मि। किन्तु प्रिये, जानासि एव स्वातन्त्र्यरक्षणार्थं मया कृतान् भगीरथप्रयत्नान्। अष्ट वर्षाणि दृढतया कृतः तैलपस्य प्रतीकारः। अस्माकं भाग्यविप्लवात् तु नैव तत्र सिद्धिमान् अभवम्। अस्याः एकदुहितुः कृते च स्वीकृता इयं दुरवस्था। अपि च, मा खलु विस्मर्यतां मृणालवत्याः उपकारः। तस्याः एव प्रसादात् अद्यापि राजते तव सौभाग्यतिलकः। यदि सा न अभविष्यत् तदा बन्दिग्राहं गृहीतं मां सत्वरमेव न्यहनिष्यत् क्रूरकर्मा तैलपः। अतः अवसरप्राप्तिं यावत् धैर्यावलम्बनमेव श्रेयः। ( विलासवतीं प्रति ) जाते, अपि त्वं तावत् सुखिनी असि ?

**विलासवती**—बाढम्।

**लक्ष्मीः**—किमस्याः सुखेन दुःखेन वा ? इयं हि मृणालवत्याः प्रयोगभूमिरस्ति। सा किल कुमारम् अकलङ्कचरितमिव इमामपि निष्कलङ्कां चिकीर्षति। हा हन्त अस्फुटकलिकोपमां निरागसं मे तनयामपि क्षोत्तुमुद्यता निर्घृणा इयम्।

**भिल्लमः**—विलासवति, अपि सत्यमाह ते जननी ?

**विलासवती**—तात, सातिशया खलु अम्बायाः असन्तोषवृत्तिः। अहं तु साम्प्रतम् अधिकाधिकां शान्तिमेव अधिगच्छामि।

**भिल्लमः**—वत्से, यदा हि कुमारस्य अकलङ्कचरितस्य अनुरूपतां प्राप्य तस्य पत्नीपदम् अलङ्करिष्यसि, तदा सर्वथा कृतकृत्याः स्याम वयम्।

**लक्ष्मीः**—( सोद्वेगम् ) सा तु भस्मीभूतयौवना एव तस्य अनुरूपा भवेत्।

**भिल्लमः**—वत्से, अद्य खलु विवृद्धाऽस्ति ते मातुः पित्तव्यथा। अतो नैव परमार्थेन ग्राह्यमस्याः वचनम्। भवतु। प्रिये, एकं निश्चयं कृतवानस्मि।

**लक्ष्मीः**—को नाम ?

**भिल्लमः**—महाराजं कांश्चन वरान् याचिष्ये। स च मम सेवां स्मृत्वा तान् अवश्यमेव दास्यति इति मन्ये।

**लक्ष्मीः**—अहो परवशता स्यूनदेशाधिपस्य !



**भिल्लमः**—प्रथमं तावद् विलासवत्याः विवाहनिश्चयं कारयिष्यामि। ततश्च स्वदेशगमनानुज्ञां याचिष्ये।

**लक्ष्मीः**—कदा नु खलु उदेष्यति तत् मङ्गलदिनम्।

**भिल्लमः**—अवश्यमेव उदेष्यति। धैर्यमवलम्ब्यताम्।

**विलासवती**—तात, सकृत् तावद् द्रष्टुमिच्छामि मुञ्जराजम्।

**भिल्लमः**—अद्य यात्रासमये द्रक्ष्यसि एव।

**लक्ष्मीः**—नाथ, कथं नाम वराकी इयं तम् अवलोकितुं प्रभवेत् ? यतः मृणालवती ब्रूयाद् यद् ईदृशी जिज्ञासाऽपि व्रतभङ्गकारिणी एव इति। षोडशे वर्षे वैधव्यमापन्ना वृद्धा षोडशवर्षीया बाला च इत्येतयोः तस्याः मते नैव किञ्चिदन्तरम्।

**भिल्लमः**—( किञ्चित्कठोरस्वरेण ) अलमेवंविधम् उक्त्वा। अथ कश्चित् शृणुयात्—

**विलासवती**—तात, यदि भवान् मृणालमातरं विज्ञापयेत् तदा साऽपि कदाचिद् अनुमन्येत।

**भिल्लमः**—अवश्यं विज्ञापयिष्यामि।

[ नेपथ्ये ]

भो भो मान्यखेटपुरवासिनः, मालवाधीशं मुञ्जं पराजित्य पृथिवीवल्लभपदं प्राप्तवतः तैलपमहाराजस्य विजययात्रा अचिरादेव राजमार्गेण यास्यति। तत् सर्वैरेव तद्विलोकनसुखमनुभूयताम्। तथा च अद्यप्रभृति मासावधिः विजयोत्सवो भविष्यति। तदर्थं च साम्प्रतं प्रचलिताः उत्सवसम्बद्धाः प्रतिषेधाः संहृताः सन्ति। तत् सर्वैऽपि सकलप्रकारैः प्रकटीकुर्वन्तु स्वानन्दभरम्।

इति प्रथमः अङ्कः।

———

# द्वितीयः अङ्कः ।

## प्रथमः प्रवेशः ।

**स्थलम्**—मृणालवत्याः मन्दिरम् ।

**समयः**—प्रथमः दिवसः । मध्याह्नसमयः ।

[ मृणालवती जक्कलादेवी च मञ्चकासीने स्तः । ]

**मृणालवती**—जक्कले, नूनं महाभागाऽसि । अद्ययावद् अयं नराधमो मुञ्ज एव तैलङ्गणयशःपताकां कलङ्कितां कृतवान् । अतः तस्य निर्जितत्वात् अचिरादेव ते विक्रमशालिनो भर्तुः समस्ते भारतवर्षे एकातपत्रं प्रभुत्वं प्रस्थापितं स्यात् । हन्त सुदीर्घा अस्माकं तपस्या महादेवप्रसादात् अन्ते सफलतां गता ।

**जक्कला**—तत्र तु आर्यायाः दृढनिश्चय एव कारणम् । नो चेत्, असकृत् पराजितो मे पतिदेवः प्रागेव मुञ्जेन सन्धिं विधाय तस्य सामन्तः अभविष्यत् ।

[ ततः प्रविशन्ति भिल्लमः लक्ष्मीदेवी विलासवती च । ]

**भिल्लमः**—( प्रणम्य ) मातः, अभिवादये । अपि भवत्या विजययात्रायाः समुचितसिद्धता समादिष्टा ?

**मृणालवती**—न जाने किमिति समुचितसिद्धता कार्या इति ।

**भिल्लमः**—पृथिवीवल्लभः खलु जितोऽस्माभिः । अतो यात्रा तदनुरूपा एव भवतु ।

**मृणालवती**—( सरोषम् ) महासामन्त, को नाम पृथिवीवल्लभः ? साम्प्रतं वल्लभान्तरं गताऽस्ति पृथिवी ।

**भिल्लमः**—सत्यमाह भवती । इदानीं तैलपराज एव पृथिवीवल्लभः, न मुञ्जः । तथाऽपि तदर्थमपि विजयोत्सवः कार्य एव ।

**मृणालवती**—हा धिक् । युष्माभिः सर्वत्र उत्सव एव इष्यते । कदा नु खलु सुबुद्धिरुदिता स्याद् युष्मासु ?



**भिल्लमः**—मातः, न खलु साधारणोऽयं प्रसङ्गः ।

> **शते समानां जगति प्रजायते तथा सहस्रे कश्चिदेव दृश्यते ।**
> **न जीयते किन्त्वयुतेऽपि सङ्गरे मुञ्जेन तुल्यो नरवीरकेसरी ॥ १ ॥**

**मृणालवती**—महासामन्त, अलम् आत्मश्लाघया । अहङ्कार एव मूलं सकलपापानाम् ।

**भिल्लमः**—मातः एतत्तु भवत्या अवश्यकर्तव्यमेव ।

**मृणालवती**—किमिव ?

**भिल्लमः**—विजययात्रावलोकनम् ।

**मृणालवती**—किन्निमित्तम् ?

**भिल्लमः**—मातः, भवत्याः प्रताप एव मुञ्जग्रहणकारणम् । अतो भवत्याः उपस्थितिः जनानां सन्तोषाय एव स्यात् ।

**मृणालवती**—भवतु । विचारयिष्यामि ।

**भिल्लमः**—इयं विलासवती अपि विजययात्रां द्रष्टुमिच्छति ।

**मृणालवती**—( सरोषम् ) महासामन्त, युवाभ्यामेव दूष्यते एषा निर्दोषमना बालिका । विलासवति, किं न कदाचिद् यात्रा अवलोकिता ? न सैन्यं दृष्टम् ? न वा तैलपराजो विलोकितः ? तत् किमिति एतद् यात्रादर्शने कौतूहलम् ?

**भिल्लमः**—मातः, यदि न इदानीं तर्हि कदा खलु सा मुञ्जं पश्येत् ?

**मृणालवती**—न खलु जानामि किं द्रष्टव्यं तस्मिन् दुरात्मनि इति । स एव अस्थिपञ्जरः, तदेव त्वगावरणम्, सा चैव नरकपूरिता तनुः ।

> **तस्यास्ति किं स्वर्णमयं शरीरं गात्राणि किं रत्नमयानि वाऽपि ।**
> **साधारणं मानववर्ष्म लोके कौतूहलं तत्र किमर्थमेतत् ? ॥ २ ॥**

**भिल्लमः**—मातः अयम् अस्थिपञ्जरस्तु नैव साधारणः । अनन्यसाधारणं हि तस्य रूपम् ।

**मृणालवती**—( सतिरस्कारम् ) रूपम् ? मूर्खैरेव रूपं बहु मन्यते । भिल्लमराज, मानवस्य महिमा शीलायत्तः, न रूपायत्तः । किं खलु अन्तरं सरल-

वक्रयोर् नासिकयोः अल्पविशालयोर् नयनयोर्वा ? अन्ते सर्वं भस्मसादेव भविष्यति। अपि मुञ्जस्य रूपवत्त्वं तस्य भस्मीभवने स्तोकमपि विलम्बं कारयेत् ?

**भिल्लमः**—सत्यमुक्तं भवत्या। तथाऽपि तैलङ्गणभाग्यविधात्री इति भ्रातुर् विजययात्रां तावद् अवलोकताम् आर्या, येन प्रजानामपि वृद्धिमियाद् उत्साहः।

**मृणालवती**—भवतु, विचारयामि। यदि अहं पश्यामि तदा विलासवती अपि पश्येद् विजययात्राम्।

**भिल्लमः**—अनुगृहीतोऽस्मि। इदानीम् अनुज्ञायतां मे यात्रार्थगमनम्।

**मृणालवती**—गम्यताम्। [ भिल्लमो निष्क्रान्तः। ] विलासवति, किम् अत्युत्सुकाऽसि मुञ्जदर्शनाय ?

**विलासवती**—न मनागपि।

**मृणालवती**—स किल दर्शनीयाकृतिरस्ति।

**विलासवती**—किं मे तद्दर्शनेन ?

**मृणालवती**—साधु विलासवति, साधु। सत्यमेव निष्कलङ्कं ते मनः। अतो न काऽपि हानिर्यात्रादर्शने। ( जक्कलां प्रति जक्कले, जानासि एव यथा नास्ति मे रुचिलेशोऽपि पुरुषरूपदर्शने। तथाऽपि देशस्यास्य राज्यकार्य-विधात्री अहम्। अतो यदि अस्मिन्नवसरे अदृष्टा तिष्ठेयम्, तदा स्वकर्तव्यात् प्रमत्ता एव स्याम्। तस्मात् प्रजोत्साहवर्धनार्थम् उचितमेव मन्ये यात्रावलोकनम्।

**जक्कला**—सत्यमभिहितम् अत्रभवत्या।

[ नेपथ्ये कोलाहलः। जयतु तैलपमहाराजः, जयतु आर्या मृणालवती, जयतु तैलङ्गदेशः इति घोषाः श्रूयन्ते। मृणालवती जक्कलादेवी च एकं गवाक्षं गच्छतः, लक्ष्मीदेवीविलासवत्यौ च अन्यम्। ]

**लक्ष्मीः**—विलासवति, पश्य, पश्य। अयं स मुञ्जराजः।

**विलासवती**—अहो अद्भुतदर्शनोऽयं पुरुषः !



शोभामस्य मुखस्य पुष्यति परां श्यामायतं कैशिकं
स्रस्तं स्कन्धयुगे स्रवत् सुरसरित्स्रोतो यथा शूलिनः।
पश्चाद्बद्धकरस्य पीवरमुरः क्षिप्तं पुरश्चाधिकं
विश्वं भापयतीव भूतलमहो दुर्धर्षतां दर्शयत् ॥ ३ ॥

ग्रीवा च पुष्टदीर्घाऽस्य बिभर्ति सुषमां पराम्।
फणेव हि पराकृष्टा फणिनो दंशनार्थिनः ॥ ४ ॥

पश्चात् क्षिप्तं च साटोपमुत्तमाङ्गं समुन्नतम्।
मन्ये तिरस्करोत्येव निखिलं भुवनत्रयम् ॥ ५ ॥

**मृणालवती**—( आत्मगतम् ) कथमस्य शरीरात् निःसरत् तेजः तिरस्करोतीव मे प्रभावशालितां राजसत्तां च तैलपस्य। किं मुञ्जस्यैव इयं विजययात्रा तैलपस्य वा ? ( विहस्य ) अथवा, मूर्खतामूल एवायं प्रश्नः। क्व नाम मे विजयशाली भ्राता, क्व चायं पराजितः क्षुद्रजन्तुः।

**लक्ष्मीः**—( अपवार्य ) विलासवति, पश्य। मृणालमाताऽपि अनिमिषनेत्राभ्यां पिबतीव तस्य रूपामृतम्।

**जक्कला**—लक्ष्मि, कीदृशो मन्यते मुञ्जः ?

**लक्ष्मीः**—स्थाने खलु उच्यते पृथिवीवल्लभः।

**मृणालवती**—( सरोषम् ) लक्ष्मि, अधुना तैलपराज एव यथार्थः पृथिवीवल्लभः, नासौ पापात्मा।

**विलासवती**—किन्तु मातः, तस्य रूपम् अदृष्टपूर्वमेव।

**मृणालवती**—( विलासवत्याः कर्णाग्रं पीडयित्वा, सक्रोधम् ) किमचिरादेव विस्मृताऽसि सर्वम् ? अत एव नैच्छं ते यात्रावलोकनम्। यदि ईदृशरूप-दर्शनेन एवं प्रमत्ताऽसि, तत् कथं निष्कलङ्का भविष्यसि ? अपि दृश्यते विकारलेशोऽपि मयि ? अपेत सर्वाः। यस्याः कस्याश्चित् मनसि मुञ्जदर्शनेन आनन्दोर्मिः उदिता स्यात् सा सत्वरमेव गत्वा प्रायश्चित्त-मारभताम्। [ लक्ष्मीदेवी जक्कलादेवी विलासवती च निष्क्रान्ताः। आत्मगतम्। अहो महान् मे तपश्चरणस्य प्रभावः यत् मुञ्जदर्शनेन विकृतिमापन्नासु अपि सर्वासु स्थिरमतिरेव स्थिताऽस्मि। ( चिन्तनपरा

भूत्वा ) मूढे मृणालवति, किमिति वञ्चयसि आत्मानम् ? यदि स्थिरमतिरासीः तत् किमर्थं मुञ्जम् अनिमिषनेत्राभ्याम् अवलोकमाना स्थिता ? ( विहस्य ) अहो बालिशोऽयं विचारः । अहं खलु बन्धोः वैरिणमेव वीक्षमाणा स्थिता । अधमतायाः परां कोटिमापन्नो जन्तुः कीदृशो वर्तते इत्येव आसं द्रष्टुकामा । [ ततः प्रविशति तैलपः भिल्लमेन अनुयातः। तैलपः मृणालवत्याः चरणौ वन्दते । ] वत्स, आयुष्मान् भव । यथार्थः पृथिवीवल्लभो भव । दिष्ट्या वर्धसे मुञ्जविजयेन ।

**तैलपः**—मृणालमातः, अस्मै महासामन्ताय अपि दीयताम् आशीर्वचनम्, यस्य प्रतापेनैव अद्य रक्षिता मे प्राणाः क्षपितं च मुञ्जयशः ।

[ भिल्लमो मृणालवतीं प्रणमति । ]

**मृणालवती**—भिल्लमराज, भवन्तमुद्दिश्य सदैव तिष्ठति ममायम् आशीर्वादो यद् भवान् चिरं जीवतु तैलपराजसामन्तेषु च प्रथमस्थानमधितिष्ठतु । ( भिल्लमो विषादं नाटयति । तैलपं प्रति ) वत्स, अतिमात्रं श्रान्तो दृश्यसे । तदुपविश्यताम् ।

[ तैलपो भिल्लमश्च आसनस्थौ भवतः । ]

**तैलपः**—मृणालमातः, यत्सत्यं तव शिक्षाया एवायं प्रभावः यत् मयाऽयम् अपूर्वो विजयः सम्पादितः ।

**मृणालवती**—सत्यमुक्तं त्वया । अनियतः सुखभोगः पौरुषनाशायैव भवति । अत एव भोगविष्ठायां लुठ्यन्तः मालवदेशीयाः कृमिकीटकाः पराभूताः, वैराग्यामृतसेविनः तैलङ्गणयोधाश्च विजयश्रिया अनुगृहीताः ।

**तैलपः**—भवतु । किमिदानीं क्रियतां मुञ्जविषये ?

**मृणालवती**—( दन्तान् निष्पिष्य ) स पापिष्ठः खलु घोरतमं दण्डमर्हति ।

**तैलपः**—तत् किं श्व एव तस्य वधः कार्यः ?

**मृणालवती**—मा मा एवम् । नहि सद्य एव हन्तव्यः स दुरात्मा । सा हि तस्मिन् कृपा एव भवेत् । एतेन नरराक्षसेन नैकाः तैलङ्गणललनाः सापत्या अपि वन्ध्यतां नीताः । त्वया च अनेकदा राजसभायां पादप्रक्षालनं कारितम् । किं बहुना, तव मम च अकीर्तिकराणि काव्यानि अपि



कृतानि कारितानि वा । स नूनं सुचिरं यातनाः कारयित्वा शनैः शनैर्मारयितव्यः । तदेव हि समुचिता स्यात् प्रतिहिंसा ।

**तैलपः**—कस्तर्हि तत्र उपायः ?

**मृणालवती**—भिल्लमराज, कः खलु भवतः अभिप्रायः ?

**भिल्लमः**—मातः, बन्दीकृतस्य नृपस्य वधे नैव किमपि गौरवं पश्यामि । कामं तस्मै यातनाः दीयन्ताम्, किन्तु तस्य शीर्षं सदा अस्पर्श्यमेव मन्तव्यम् इति मे मतिः ।

**तैलपः**—मन्मते तु रणपतनं शूलारोहणं च इत्येतयोः नास्ति किञ्चिदन्तरम् ।

**मृणालवती**—मा मा एवं भ्रातः । युक्तमेव उक्तं महासामन्तेन । कः खलु लाभः तस्य सद्योहननेन ? गर्वितस्य गर्वहरणमेव मरणाधिकम् । पश्य—

**अचलसदृशी कार्श्यं यायात् तदीयतनुर्यदा**
**द्युतिविकलतां चक्षुर्दैन्यं मुखं च गतस्मितम् ।**
**भृशमशरणो याचेत त्वां कृपां कृपणस्तदा**
**तव परिभवो भूयान् भ्रातर्भवेत् परिशोधितः ॥ ६ ॥**

**तैलपः**—सत्यमाह भवती । मुञ्जस्य गर्वहरणं तु अतिदुष्करमिति श्रूयते ।

**मृणालवती**—अतिदुष्करम् अन्येषाम्, न मम । भवतु, क्व नाम निक्षिप्तोऽसौ ?

**तैलपः**—राजप्रासादस्य भूमिगृहे ।

**मृणालवती**—भवतु, स्वयमेव गत्वा तस्य च क्षुद्रतां ज्ञापयित्वा तं हृतगर्वं करिष्यामि । अपि च, एवमपि क्रियताम् । श्वः प्रभाते राजप्रासादपुरोवर्तिनि चतुष्पथे काष्ठपञ्जरः स्थाप्यताम्, मुञ्जश्च तत्र निक्षिप्यताम्, येन अध्वगैः सावज्ञं सोपहासं च वीक्षितः असौ लज्जां प्राप्नुयात्, आत्तगर्वश्च भवेत् ।

**तैलपः**—साधु, अवश्यमेवं करिष्यामि । भवतु, भिल्लमराज, अनर्घः खलु भवदीयः उपकारः । नैव शक्तोऽहं तस्य समुचितं प्रतिफलं दातुम् । तथाऽपि किञ्चिद् आनृण्यं जिगमिषामि । अतः इदानीमेव मृणालमातुः समक्षं प्रकटीक्रियतां कश्चिद् इष्टार्थः, यस्य दानेन कृतकर्तव्यो भविष्यामि ।

**भिल्लमः**—देव, अनुगृहीतोऽस्मि भवता अनेन औदार्येण। किन्तु यत् किञ्चन मया कृतं तत् कर्तव्यबुद्ध्या एव कृतम्, न प्रतिफलेच्छया।

**मृणालवती**—भिल्लमराज, अधिकार एव भवतो वरयाचनायाम्।

**भिल्लमः**—मातः, यदि किञ्चिद् याचेय, तच्च न रोचेत भवत्यै, तदा उभावपि आवां दुःखितौ स्याव। मम हि आशाभङ्गः स्यात्, देवस्य च वचनभङ्गः।

**मृणालवती**—भिल्लमराज, मा मा एवम्। भवतो विवेकबुद्धौ तैलपस्य उदारतायां च अस्त्येव मे श्रद्धा।

**तैलपः**—भिल्लमराज, निःसङ्कोचमुच्यताम्। अद्य भवतो मित्रत्वात् नास्ति मे किञ्चित् प्रियतरम्।

**भिल्लमः**—देव एकैव स्पृहा वर्तते मे मनसि। सा च विदिता एव भवतः।

**तैलपः**—का नाम?

**भिल्लमः**—कुमारस्य अकलङ्कचरितस्य विलासवत्याश्च विवाहो भवतु।

**मृणालवती**—(विहस्य) कथमेतावद् विचार्य अयमेव वरो वृतः? अयं तु दत्तपूर्व: एव।

**भिल्लमः**—तथाऽपि विवाहः शीघ्रमेव भवतु इत्येव काङ्क्षामि।

**मृणालवती**—भिल्लमराज, विवाहदिवसोऽपि निश्चितोऽस्ति। सम्प्रति प्रवर्तमानाद् विजयोत्सवाद् अनन्तरमेव आगामिनि मासे विवाहोत्सवोऽपि भविष्यति।

**तैलपः**—भिल्लमराज, कश्चिदन्यो वरो व्रियताम्। भवता सम्प्रति वृतेन वरेण नूनं लज्जां प्रापितोऽस्मि। किं नास्ति किमपि मत्सविधे यल्लाभेन भवान् प्रमुदितः स्यात्?

**भिल्लमः**—(आत्मगतम्) किं खलु याचेय? अपि स्वदेशगमनानुज्ञां याचेय, यया लक्ष्मीः सन्तोषिता स्यात्? न पुनरेतद् अनुमन्येत तैलपेन। अथवा, (सहसैव स्मृत्वा) आम्, स्मरामि तद् वचनं पृथिवीवल्लभस्य-'मम तावत् काऽपि गतिर्भवतु, मम कवयस्तु रक्षणीयाः भवता' इति। (प्रकाशम्) देव, भवतो राज्ये किं नाम न्यूनमस्ति मे? तथाऽपि यदि भवान् अनुमन्यते तर्हि एकमेव अर्थमिच्छामि।



**तैलपः**—विना सङ्कोचमुच्यताम्।

**भिल्लमः**—मालवकविभ्यः अभयं दीयताम्।

**तैलपः**—(सहास्यम्) अहो विचित्रस्ते प्रणयः!

**मृणालवती**—(सभ्रूभङ्गम्) नैव जानामि प्रणयस्यास्य औचित्यम्।

**भिल्लमः**—मातः, मम पूर्वजाः कविगणत्रातारः उक्ताः। मया पुनरद्ययावत् न किमपि कृतमस्य उपाधेः सदृशम्। अतः अयमेव मे अवसरः किञ्चिद् अनुष्ठातुम्।

**मृणालवती**—भिल्लमराज, को नाम भवतो लाभः ईदृशानां पापिनां प्राणरक्षणेन भूमिभारवर्धनेन?

**तैलपः**—ईदृशानां क्षुद्रजन्तूनां रक्षणादन्यत् किञ्चिद् व्रियताम्।

**भिल्लमः**—देव, भवता सनिर्बन्धमुक्तत्वादेव कृतवान् अहमिमां याचनाम्। अथ न रोचते भवते, तर्हि प्रत्याख्यायताम्।

**तैलपः**—(मृणालवतीमुखम् अवलोक्य) भवतु, अभयमस्तु मालवकवीनाम्।

**मृणालवती**—परं भिल्लमराज, तान् मुञ्जस्य अपकीर्तिङ् गापयिष्यामि। अन्यच्च, तेषां जनेषु मुक्तसञ्चारः प्रतिषिद्धोऽस्ति। न हि तत्सङ्गेन स्वजनान् दूष्यमाणान् इच्छामि।

**भिल्लमः**—यथाऽऽज्ञापयति आर्या। स्वगृहे एव तान् निवासयिष्यामि। भवतु, सुतरामनुगृहीतोऽस्मि। देव, साम्प्रतम् अनुमन्यतां मे गमनम्।

**तैलपः**—भवतु, गम्यताम्। [भिल्लमो निष्क्रान्तः।]

**मृणालवती**—वत्स, नैष मे विश्वासभूमिः।

**तैलपः**—मा मा एवम्। सर्वथा सरलप्रकृतिरेव आर्यभिल्लमः। तस्य पत्नी तु तं नित्यं प्रक्षोभयन्ती आस्ते। अत एवाद्य स मया वरयाचनां विज्ञापितः।

**अकलङ्कचरितः**—(प्रविश्य) तात, कृतं सर्वं यथादिष्टम्।

**तैलपः**—साधु। वत्स, निश्चितस्ते विवाहदिवसः।

**अकलङ्कचरितः**—साधु।

**मृणालवती**—अस्माद् विजयोत्सवाद् अनन्तरमेव भविष्यति ते विवाहोत्सवः। भवतु, गम्यताम् अधुना। सकृत्तु विलासवतीं द्रष्टुमर्हसि।

**अकलङ्कचरितः**—यथाऽऽज्ञापयति माता। [ निष्क्रान्तः। ]

### इति प्रथमः प्रवेशः।

---

## द्वितीयः प्रवेशः।

**स्थलम्**—भिल्लमस्य उद्यानम्।

**समयः**—द्वितीयः दिवसः। प्रातःकालः।

[ भिल्लमो रसनिधि-धनञ्जय-पद्मगुप्तैः सार्धं प्रविशति। ]

**भिल्लमः**—कः कोऽत्र भोः? ( शशाङ्कः प्रविशति। ) शशाङ्क, क्व वर्तते लक्ष्मीः विलासवती वा?

**शशाङ्कः**—स्वामिन्, लक्ष्मीदेवी राजगृहं गताऽस्ति, विलासवती च शिवालयम्।

**भिल्लमः**—भवतु, गत्वा देहि उभाभ्याम् अस्मदागमनवार्ताम्। [ शशाङ्को निष्क्रान्तः। ] क्षम्यतां कविवराः, स्वीक्रियतां चास्य सामान्यजनस्य अतिथिसत्कारः।

**धनञ्जयः**—अपि यमराजो भवान्?

**भिल्लमः**—किम्?

**धनञ्जयः**—**मान्यखेटपुरे शुष्के को नु दण्डधरादृते।**
**कविभ्य एवमस्मभ्यं स्वागतं व्याहरिष्यति?॥ १॥**

**रसनिधिः**—धनञ्जय, न खलु एष साक्षाद् यमराजः, किन्तु तस्य दूतश्रेष्ठः स्यूनाधिपतिरिव।

**भिल्लमः**—भोः कविवराः, नाहं यमराजो यमदूतोऽपि वा, किन्तु तैलपराजस्य महासामन्तो युष्मान् यमहस्तात् परित्रातुमेव अत्र आनीतवानस्मि।

**रसनिधिः**—( सविस्मयम् ) किमुक्तम्? अस्मान् यमहस्तात् परित्रातुकामो भवान्? अपि एतत् स्वप्नेऽपि सम्भाव्यम्?

**धनञ्जयः**—अथवा आर्यभिल्लमः परिहसतीति मन्ये। भिल्लमराज, न खलु युक्तो दुःखितानां परिहासः।



**भिल्लमः**—नेदं परिहासवचनं, परं सत्यकथनमेव। तैलपराजेन मद्वचनात् जीवितदानं दत्तमस्ति वः।

**पद्मगुप्तः**—को नाम विश्वस्यादत्र? नहि सूर्याद् अमृतनिष्यन्दो भवति।

**भिल्लमः**—भोः मान्याः कविश्रेष्ठाः, श्रूयताम्। मम पूर्वजाः किल काव्यरसिकाः अभवन्, कविगणत्रातारश्च उक्ताः। अहं तु परवशत्वाद् बहूनि वर्षाणि कविजनानां न काञ्चन सेवां कर्तुं प्राभवम्। अत एव विजयानन्दितेन तैलपमहाराजेन वरयाचनां विज्ञापितोऽहं भवतां मुक्तिमेव याचितवान्।

**रसनिधिः**—साधु भिल्लमराज, साधु। तत्रैव सर्वथा शुष्कतां गतं मान्यखेटनगरम्। भवता च यथार्थतां नीतः कविगणत्राता इति पूर्वजानाम् उपाधिः।

**पद्मगुप्तः**—भोः राजश्रेष्ठ, सुतरामनुगृहीताः स्मः। न खलु ज्ञायते कथमत्रभवतः आनृण्यं प्राप्नुयाम इति।

**धनञ्जयः**—किन्तु भिल्लमराज, निष्फल इवाभाति भवतोऽयमारम्भः। यतः—

**पृथिवीवल्लभाभावान्नीरसे पृथिवीतले।**
**किमस्ति नाम यस्यार्थे जीवितुं कामयेमहि?॥ २॥**

**भिल्लमः**— कविसत्तमाः, सम्यग् जानामि तीव्रतां वो दुःखस्य। तथाऽपि भवतां दुःखं यथाशक्ति लघूकर्तुं प्रयतिष्ये। अद्यप्रभृति अत्रैव निवसन्तः स्वीकुर्वन्तु भवन्तो मे आतिथ्यम्।

**पद्मगुप्तः**—राजन्, शब्दधनाः किल कवयः। अस्माकं तु समस्तमपि वाग्धनं भवतो महिमानं गातुम् अपर्याप्तं स्याद् इति मे मतिः।

**भिल्लमः**—अलमेतेन स्तवातिशयेन। क्व खलु भवतां स्वामी पृथिवीवल्लभः, क्व चाहं क्षुद्रः तैलपराजसेवकः? भवतु, अधुना भवतां नामधेयानि ज्ञातुमिच्छामि।

**रसनिधिः**—अहं रसनिधिः। एष धनञ्जयः। अयं च पद्मगुप्तः।

**पद्मगुप्तः**—राजश्रेष्ठ, किं नाम क्रियताम् अस्माभिः भवतः कृते?

**भिल्लमः**—किमन्यत्? नित्यं काव्यकथादिभिः अस्मान् नन्दयन्तु भवन्तः। मम पत्नी तथा च दुहिताऽपि सुचिरमुत्सुके स्तः कविदर्शनाय काव्यश्रव-

णाय च। पश्यत, इयमायाति मे सुता विलासवती। ( ततः प्रविशति विलासवती। ) एहि विलासवति। ननु कवीन् द्रष्टुमिच्छसि ? इमे अत्र स्थिताः मालवकवयः। अयं कविराजो धनञ्जयः, यस्य नामधेयम् अस्माकं स्यूनदेशेऽपि सुविश्रुतमासीत्। ( विलासवती धनञ्जयं प्रणमति। )

**धनञ्जयः**—वत्से,

**भूत्वा भाग्यवती भार्या रामसन्निभभूपतेः।**
**भास्करेण समं सूनुं भासुरं समवाप्नुहि ॥ ३ ॥**

**भिल्लमः**—अयं च रसनिधिः ( विलासवती रसनिधिं प्रणमति। )

**रसनिधिः**—( सस्मितम् ) किं खलु दद्यां ते आशीर्वचनम् ?

**संवूर्यतां सुधानाथः सेव्यतां च सुधारसः।**
**निर्विश्यतां तथा नित्यमानन्दनिधिरुत्तमः ॥ ४ ॥**

**भिल्लमः**—( उच्चैर्विहस्य ) कविमहाशय, नेयम् अवन्तिपुरी।

**रसनिधिः**—सत्यमेव। अत एव इयं मे दशा।

**भिल्लमः**—अत्र हि सुधानाथः शोषमापन्नः, आनन्दानुभवश्च महापापपदवीम् आरूढोऽस्ति।

**रसनिधिः**—( साश्चर्यम् ) एवम् ?

**भिल्लमः**—न खलु विदितम् अत्रभवतां मृणालमातुर्वैराग्यम्। किं बहुना, अनया विलासवत्या अपि तपश्चरणं क्रियते।

**धनञ्जयः**—किमर्थम् ?

**भिल्लमः**—अस्याः विवाहः कुमारेण अकलङ्कचरितेन सह निश्चितोऽस्ति। अतो मृणालमाता इमां वैराग्यशिक्षाप्रदानेन तैलङ्गणसम्राज्ञीपदानुरूपां चिकीर्षति।

**धनञ्जयः**—तेन हि शुष्कीभूतहृदया एव एषा सम्राज्ञीपदं प्राप्नुयात्।

[ नेपथ्ये कोलाहलः करतालनादश्च। ]

**भिल्लमः**—कः कोऽत्र भोः ? [ शशाङ्कः प्रविशति। ] शशाङ्क, गत्वा ज्ञायतां किन्निमित्त एष कोलाहल इति। [ शशाङ्को निष्क्रान्तः। ] भवतु। विलासवति, अयं तृतीयः कविः पद्मगुप्तः। (विलासवती पद्मगुप्तं प्रणमति।)



**पद्मगुप्तः**—जाते, काव्यरसिका भव।

**रसनिधिः**—एवं तैलङ्गणदेशात् कवयो निष्कासिता इति जनश्रुतिः अनपेता एव स्यात्। भिल्लमराज, अस्मिन् देशे नास्ति काव्यं, न वा रसः, न च आनन्दः। तत् किं नाम अवशिष्टम् ?

**भिल्लमः**—रसरहितो निधिरेव। ( हसति ) भवतु। विलासवति, दीयताम् अस्य प्रश्नस्य उत्तरम्।

**विलासवती**—त्यागः शान्तिश्च।

**रसनिधिः**—केन खलु इह परमार्थतः कृतोऽस्ति त्यागशान्त्योरनुभवः ?

**भिल्लमः**—( सहासम् ) अत्र सर्वे एव देवपदवीम् आरूढाः।

**रसनिधिः**—देवाः अपि आनन्दमूर्तयः। युष्माभिस्तु पाषाणत्वमेव प्राप्तुं प्रयत्यते।

**विलासवती**—मा मा एवम्। न खलु पाषाणत्वं परन्तु शान्तिरेव ईप्सितमस्माकम्। अस्मिन् संसारे शान्तिं वर्जयित्वा चञ्चलमेव सर्वम्। शान्तिश्च वैराग्येणैव साध्या।

**रसनिधिः**—भद्रे, नैतत् सत्यम्। वैराग्यजनिता शान्तिरपि कदाचित् चला स्यात्। आनन्द एव परमार्थतो निश्चलः।

**विलासवती**—कथं तु शान्तिं विना आनन्दाधिगमः ?

**रसनिधिः**—सुखानुभवात्।

**विलासवती**—स तु क्षणिक एव।

**रसनिधिः**—रसिकस्य तु शाश्वतसुखमपि सुलभमेव।

**भिल्लमः**—पश्यत कविवराः, इयमायाति मे सहधर्मचारिणी। [ लक्ष्मीः प्रविशति। ] प्रिये, इमे ते मालवकवयः।

**लक्ष्मीः**—अहो धन्याऽस्मि। भोः कविवर्याः, चिरेण खलु पावनतां गतम् अस्मदीयभवनाङ्गणं भवदीयपदस्पर्शात्।

**रसनिधिः**—( प्रणम्य ) आर्ये, अभिवादये। नहि शुष्कदेशेऽस्मिन् अपेक्षितः अस्माभिः ईदृशः सत्कारः।

**लक्ष्मीः**—कविश्रेष्ठाः, अद्यप्रभृति स्वकीयमेव गण्यतामेतद् गृहम् । परं भवतामत्र निवासः अज्ञात एवास्तु बाह्यानाम् ।

**शशाङ्कः**—( प्रविश्य ) स्वामिन्, साम्प्रतं चतुष्पथे महान् जनसम्मर्दः पुञ्जीभूतोऽस्ति ।

**भिल्लमः**—किन्निमित्तम् ?

**शशाङ्कः**—मुञ्जदर्शनार्थम् । स हि तत्र एकस्मिन् काष्ठपञ्जरे निरुद्धोऽस्ति ।

**भिल्लमः**—अपि स पथिकैः उपहस्यते ?

**शशाङ्कः**—नैव स्वामिन् । न केवलं न उपहस्यते किन्तु सादरं सकौतुकं च विलोक्यते ।

**भिल्लमः**—विफलस्तर्हि मृणालवत्याः मनोरथः ।

**शशाङ्कः**—स्वामिन्, मुञ्जराजेन समुदायवर्तिनी काचिद् बाला समीपमाहूय पृष्टा 'बाले, अपि गातुं शक्नोषि किमपि गीतं काव्यं वा ? ' इति । अथ यदा तया 'न' इति प्रत्युक्तं तदा स तां किमपि काव्यं शिक्षयितुमारब्धः । अत एवाभवत् स करतालनादः ।

[ नेपथ्यात् मुञ्जस्य शब्दः श्रूयते । ]

**मुञ्जः**—भो; रसिकाः मान्यखेटवासिनः, किमिति तूष्णीं स्थीयते ? गीयतां सोत्साहभरम् ।

**तैलप नृप तव नगरी नित्यं गानतानरसहीना ।**
**पृथिवीवल्लभचरणस्पर्शाज्जाता प्रमुदितवदना ॥**
**भोगो नहि पापम् । शमयति यो जनसन्तापम् ॥ ५ ॥**

[ जनाः अपि अनुगायन्तः श्रूयन्ते । ]

**भिल्लमः**—धन्यः खलु पृथिवीवल्लभः येन समरे जितेनापि पञ्जरगतेनापि च स्वप्रभावेण विजितानि सन्ति मान्यखेटजनमनांसि । भवतु, कविश्रेष्ठाः, अधुना विश्राम्यन्तु भवन्तः । शशाङ्क, एतैः यद्यद् इष्येत तत्तद् अविलम्बं देहि ।

**शशाङ्कः**—यथाऽऽज्ञापयति महाराजः । [ कवयः शशाङ्कश्च निष्क्रान्ताः । ]



**लक्ष्मीः**—( अपवार्य ) नाथ, किञ्चिद् विवक्षामि ।

**भिल्लमः**—उच्यताम् ।

**लक्ष्मीः**—एतेषां कवीनाम् एकतमः सविशेषाकृतिः दृश्यते ।

**भिल्लमः**—सत्यमभिहितं त्वया । स रसनिधिः खलु वीर इव राजकुमार इव वा लक्ष्यते । न कदाचिद् एवङ्गुणविशिष्टः कविरीक्षितो मया ।

**लक्ष्मीः**—अपि नाम असौ मुञ्जस्य एव बान्धवः स्यात् ?

**भिल्लमः**—स्यादपि । नैव तद् असम्भाव्यम् । भवतु, पश्य । अयं कुमारः इत एवागच्छति । तन्न युक्तम् अनयोः संलापस्य परिपन्थीभवितुम् ।

[ भिल्लमः लक्ष्मीदेवी च निष्क्रान्तौ । ]

**अकलङ्कचरितः**—( प्रविश्य ) विलासवति, नमस्ते ।

**विलासवती**—नमो भवते । दिष्ट्या विजयेन वर्धते भवान् ।

**अकलङ्कचरितः**—सत्यमुक्तं त्वया । भगवतः पिनाकपाणेः प्रसादात् जितमस्माभिः ।

**विलासवती**—पराजितश्च मालवराजः ।

**अकलङ्कचरितः**—बाढम् । सत्यमेव जयते, नानृतम् ।

**विलासवती**—कच्चित् कुशली भवान् ?

**अकलङ्कचरितः**—अथ किम् । मृणालमातुर्वचनात् सुवार्तां ते कथयितुमागतः ।

**विलासवती**—का नाम सुवार्ता ?

**अकलङ्कचरितः**—आवाम् अचिरादेव गृहस्थाश्रमं प्रवेक्ष्यावः ।

**विलासवती**—सत्यम् ? कथं ज्ञातम् ?

**अकलङ्कचरितः**—अद्यैव श्रुतं मया तातमुखात् ।

**विलासवती**—अपि किञ्चिदुक्तं मृणालमात्रा ?

**अकलङ्कचरितः**—मृणालमात्रा उक्तं यदस्मात् विजयोत्सवादनन्तरमेव विवाहोत्सवो भविष्यति इति । विलासवति, त्वं सम्यगुत्तीर्णाऽसि मृणालमातृकृतां परीक्षाम् ।

**विलासवती**—अहो परमं मे भाग्यम् ।

अकलङ्कचरितः—तत् किमापृच्छे त्वामिदानीम् ?

विलासवती—यथा इष्यते भवता ।

अकलङ्कचरितः—भवतु । जयतु महादेवः ।

विलासवती—भवतु । अहमपि साम्प्रतं स्वाध्यायार्थं शिवमन्दिरमेव गच्छामि । ( उभावपि निष्क्रान्तौ । )

इति द्वितीयः प्रवेशः ।

---

## तृतीयः प्रवेशः ।

स्थलम्—भूमिगृहम् ।

समयः—द्वितीयः दिवसः । सायङ्कालः ।

[ मुञ्जः सुप्तो दृश्यते । ततः प्रविशति मृणालवती । ]

मृणालवती—( निर्वर्ण्य ) कथं सुप्तो दृश्यते । प्रायेण ईदृशीं दशामापन्ना जनाः प्रक्षुब्धमानसाः चिन्ताग्रस्ताः उन्निद्राश्च जायन्ते । अयं पुनः स्वगृहसुप्तमिव कलयति आत्मानम् । अहो परा कोटिरियं निर्लज्जतायाः । कः खलु अर्थः अनेन सह सम्भाषितेन ? नूनं निवृत्तिरेव श्रेयसी । [ परावर्तते । मुञ्जो हसति । हास्यध्वनिं श्रुत्वाऽऽत्मगतम् ] कथं हसति निरपत्रपः । हास्यं च अस्य अवमानकरम् आभाति । तन्न युक्तं निवर्तनम् । [ पराङ्मुखी तत्रैव तिष्ठति । ]

मुञ्जः—( उपविश्य ) आर्ये मृणालवति, स्थीयतां मुहूर्तमात्रं दीयतां च मे दर्शनमात्मनः । बहु खलु श्रुताऽस्ति मया भवत्याः प्रशंसा ।

मृणालवती—( सक्रोधम् ) आः पापिन्, किमस्यां दुरवस्थायां वर्तमानोऽपि वाच्यावाच्यं न जानासि ?

मुञ्जः—का नाम दुरवस्था ?

मृणालवती—दुरवस्था ? पृच्छ ते कीर्तिम् । पृच्छ ते कवीन् । पृच्छ ते सेनाम् ।



मुञ्जः—ननु मम कीर्त्या एव तैलपस्य तपस्विनी स्वसा अत्र समाकृष्टा ? ननु मे कवीनां काव्यैरेव भवत्यां मां द्रष्टुमिच्छा समुत्पादिता ? ननु च मे सेनायाः प्रतापेनैव चकितया अत्रभवत्या मां निग्रहीतुं प्रयतितम् ?

मृणालवती—स एव त्वं श्वः कुक्कुरोचितं मरणमवाप्स्यसि ।

मुञ्जः—नैतत् सम्भवति ! चक्रवर्तिसदृशमेव स्यान्मे मरणम् ।

मृणालवती—रे नरराक्षस, अपि जानासि स्वकृतानि पापानि ?

मुञ्जः—सदैव मनःपूतमाचरणं कृतवानस्मि । किं तत्र पापम् ?

मृणालवती—किं स्वच्छन्दवर्तनं न पापम् ? तेनैव साम्प्रतं जीवन्नपि नरकमनुभवसि ।

मुञ्जः—नरकः ? क्व वर्तते नरकः ? अहं तु नैव पश्यामि ।

मृणालवती—रे पामर, तव इदानीन्तनी स्थितिः नूनमनूना एव नरकात् ?

मुञ्जः—( विहस्य ) मृणालवति, भ्रम एव तवायम् । यतः,

स्वर्गे वा नरके वा स्यां न तच्चिन्तावहं मम ।
न मे वृद्धिमियात् स्वर्गे क्षयं वा निरये सुखम् ॥ १ ॥

मृणालवती—निरर्थकमेतद् असत्यभाषणं मत्समक्षम् ।

मुञ्जः—किं मे प्रयोजनम् असत्यभाषणेन ?

मृणालवती—आत्मनो दुर्दशायाः अपवारणम् ।

मुञ्जः—का पुनर् मे दुर्दशा ? अहं हि तथैवास्मि यथा पूर्वमासम् ।

मृणालवती—कोऽसि ?

मुञ्जः—पृथिवीवल्लभः ।

मृणालवती—पृथिवीवल्लभः ? ( उपहसति । गभीरमुखी भूत्वा ) मूढ, पृथिवीवल्लभः तत्र प्रासादे तिष्ठति ।

मुञ्जः—क एवं मन्यते ?

मृणालवती—सर्वे एव ।

मुञ्जः—अनभिज्ञा एव ते सर्वे । मृणालवति, यत् सुखं मया प्रासादे निर्विष्टं तद् अत्रापि निर्विश्यते । तथा च विजयसमये अनुभूतः आनन्दः पराजितेन अपि अनुभूयते । पृथिव्याः वल्लभश्च तथैवास्मि यथा पूर्वमासम् ।

**मृणालवती**—( आत्मगतम् ) परा काष्ठा खलु इयं निर्लज्जतायाः । ( प्रकाशम् ) किम् अद्यापि तैलपस्य प्रतापं स्वदितुमिष्यते ?

**मुञ्जः**—कस्य प्रतापः ? तस्य पामरस्य ?

**मृणालवती**—तस्य प्रतापः तेजस्वितरस्तावकीनात् ।

**मुञ्जः**—( उत्थाय ) असत्यमेतत् । मृणालवति, आत्महृदयमेव पृच्छयताम् उभावपि युवां निष्प्रभौ स्थः मत्प्रतापात् ।

**मृणालवती**—किं प्रलपसि ? तव प्रतापात् निष्प्रभाऽहम् ?

**मुञ्जः**—कृतं कोपेन । मृणालवति, किमिति नाम क्षणभङ्गुरमेतत् जीवनम् एवं व्यर्थमेव यापयसि ?

**मृणालवती**—मूर्ख, नाहमिच्छामि उपदेशं त्वत्तः ।

**मुञ्जः**—अत एव ईदृशीमवस्थां प्राप्ताऽसि । अथ मम उपदेशम् अग्रहीष्यः तदा एवं वल्कलवसना भूत्वा नैव जीवितम् अयापयिष्यः । मृणालवति, सृष्टेः रसं सेवमानस्य न मे पलमपि दुःखमयं यातम् । तेषु तेषु प्रसङ्गेषु मया प्रतिपलं रस एव गृहीतः । अपि जातु यापितम् ईदृग्विधं जीवनम् अत्रभवत्या ?

**मृणालवती**—तन्नैव अभिजानासि माम् ।

**मुञ्जः**—सम्यग् अभिजानामि । मानभङ्गपीडिता मानिनी खलु अत्रभवती ।

**मृणालवती**—किं जल्पसि ?

**मुञ्जः**—मृणालवति, मां वशीकर्तुमागता स्वयमेव वशीभूताऽसि ।

**मृणालवती**—मुञ्ज, अलमेतेन भ्रमेण । नैव त्वां वशीकर्तुं किन्तु उपदेशेन पापपङ्कात् समुद्धर्तुमागताऽस्मि ।

**मुञ्जः**—किं नाम माम् उपदेष्टुमिच्छति आर्या ?

**मृणालवती**—निष्कलङ्कजीवनम् ।

**मुञ्जः**—( सस्मितम् ) निष्कलङ्कजीवनम् ? मृणालवति, कलङ्कितस्यैव समुचितः तदुपदेशः, न मम । अथवा, दुःखितः अपूर्ण एव वा उपदेशमर्हति । अहं पुनर् दुःखम् अपूर्णतां वा न कदाचिद् अनुभवामि । अपि च, विशालानुभवस्य मे किं नाम अध्येतव्यम् अवशिष्यते ?



**मृणालवती**—अहो वृथाभिमानः ।

**मुञ्जः**—न खलु विदितमत्रभवत्या मे जीवनम् । अत एवमुच्यते । तत् श्रूयताम्—

> **जातस्त्यक्तो जनन्या वनभुवि पृथिवीवल्लभोऽहं त्विदानीं**
> **सिंहीदुग्धं निपीतं तदनु गजवरैर्वीजितोऽहं प्रकामम् ।**
> **भिक्षापात्रं गृहीतं व्यतरमपि तथा राजसिंहासनानि**
> **दीनार्थक्लेशितात्मा सुखितनुलतिकाः क्षुण्णवान्निर्दयोऽहम् ॥ २ ॥**

अपि च,

> **भुक्तं कामं सुखमविकलं सङ्गजं सुन्दरीभि-**
> **र्लक्ष्मीतुल्या ललितवनिता लूनशीर्षाः कृताश्च ।**
> **वेदाभ्यासे कृतमपि तपो देवतादुर्लभं यज्**
> **जातोन्मादं किल पठितवान् कामशास्त्रं तथैव ॥ ३ ॥**

मृणालवति, यत्सत्यम् अत्रभवती एव उपदेशमर्हति । अनास्वादित-जीवनरसाया अत्रभवत्या पुष्पशय्यारहस्यं सानन्दभरनर्तनं वा अध्येतव्यमस्ति । तथा च कस्यचिद् रसिकस्य सन्निकर्षे—

**मृणालवती**—( दन्तोन् निष्पिष्य सक्रोधम् ) आः पापिन् ,—

**मुञ्जः**—( तामुपेत्य ) रससागरमन्थनम् अपि ।

**मृणालवती**—रे रे चाण्डाल, लज्जाशून्य, विषयलम्पट, श्वः प्रभाते सम्यग् भोक्ष्यसे फलमस्य । कथं ते जिह्वा—

**मुञ्जः**—मृणालवति,

> **नैका वशीकृता मे मानिन्यो जिह्वया भवादृश्यः ।**
> **पृथिवीवल्लभहृदये हृदयार्पणमपरिहार्यं ते ॥ ४ ॥**

[ मृणालवती सक्रोधं सावेशं च मुञ्जस्य कपोले हस्तप्रहारं करोति । मुञ्जः प्रहसन् तमेव हस्तमादाय परिचुम्बति । ]

**मृणालवती**—कः कोऽत्र भोः ? [ रणमल्लः सैनिकाभ्यां सह प्रविशति । ]

**रणमल्लः**—आर्ये, अयमस्मि ।

**मृणालवती**—रणमल्ल, किमिति न बद्धौ अस्य हस्तौ ? [ रणमल्लः सैनिकाभ्यां सह मुञ्जहस्तौ शृङ्खलाबद्धौ करोति । ] इदानीं मां स्पृष्टवतः अस्य पापिनो दक्षिणहस्ते तप्तप्रासेन मुद्रां कुरुष्व ।

**मुञ्जः**—मृणालवति, किमेतेन प्रयासेन ? तव स्पर्शेनैव दग्धानि मे अङ्गानि । तेषां दहनार्थं न खलु ज्वलनान्तरम् आवश्यकम् । ( दक्षिणहस्तं प्रसार्य ) रणमल्ल, क्रियतामत्र मुद्रा । [ रणमल्लः अलाततप्तप्रासेन मुञ्जहस्ते मुद्रां करोति । ] मृणालवति, यदि त्वम् एतावता सन्तुष्येः इति पूर्वम् अज्ञास्यम्, तदा स्वयमेव अधक्ष्यमहं स्वहस्तम् । भवतु, अस्य दाहस्य शमनार्थं भेषजमादाय श्वः अवश्यम् आगम्यताम् ।

**मृणालवती**—( आत्मगतम् ) कथं दग्धहस्तोऽपि तथैव भाषते ? किम् अयं मानवः राक्षसो वा ? ( निष्क्रान्ता । )

इति द्वितीयः अङ्कः ।

---

# तृतीयः अङ्कः ।

## प्रथमः प्रवेशः ।

**स्थलम्**—मृणालवत्याः मन्दिरम् ।

**समयः**—द्वितीयः दिवसः । प्रदोषकालः ।

[ मृणालवती मुक्तकेशी शोकसन्तप्तमानसा हस्तावलम्बितललाटदेशा च मञ्चकोपविष्टा दृश्यते ]

**मृणालवती**—( आत्मगतम् ) हा हताऽस्मि मन्दभाग्या । यत्सत्यं पतिताऽस्मि भ्रष्टाऽस्मि, कलङ्किता चास्मि तस्य पापस्य स्पर्शेन । हा सर्वथा निष्फलं मे जीवनम् । भस्मीभूतः तपोराशिः । अपहृतं पुण्यधनम् । कलङ्किता कीर्तिः । किं खलु सम्प्रति जीवितेन ? हा हन्त किमधुना करोमि ? अपि दशामि जिह्वाम् ? किं भित्तौ मस्तकमाहन्मि ? किम् आत्मानम् अग्निसात् करोमि ? हा कथमेष कलङ्कः प्रक्षालितः स्यात् ? कथं तस्य दुरात्मनो दुश्चरितमवलोक्य न रसातलं गता पृथिवी ? कथं न स्तब्धः सूर्यनारायणः ? कथं न स्वोदरे गृहीताऽहं विश्वम्भरया ? हा कथमेतत् कलङ्कितं मुखं स्वजनेभ्यो दर्शयामि ? ( हस्ताभ्यां मुखं संवृत्य रोदिति । )

अहो महानयं मे अपमानः । यस्या उक्तिः स्मृतिवाक्यवत् सर्वत्र शिरसि धार्यते, यस्याः पावित्र्यप्रभावेण प्रणतानि भवन्ति पापिनामपि मस्तकानि, यस्या भ्रूभङ्गेण भयाकुलानि भवन्ति निरागसामपि मनांसि, यस्याः प्रसादार्थं सर्वेऽपि साभिलाषाः, यस्याश्च विरोधं कर्तुं न कोऽपि धृष्णोति, तामिमां सम्राट्सुतां सम्राड्भगिनीं साम्राज्यविधात्रीं च स्प्रष्टुं कथमधृष्णोद् असौ पापात्मा ?

हा पराजिताऽस्मि तेन पापेन । यद्यपि अद्य तप्तप्रासमुद्रया दाहितस्तस्य हस्तः, यद्यपि च श्वः तस्य शिरश्छेदं कारयिष्यामि शकलीकरिष्यामि वा तच्छरीरम्, तथाऽपि अद्यतनो मे पराभवः परिभवो वा नैव निराकृतः स्यात् । हा कथं तं पराजेतुं गता अहमेव पराजयं प्राप्ताऽस्मि ? तं ह्रेपयितुं प्रयतमाना अहमेव ह्रेपिताऽस्मि ? तमुपदेष्टुम् उद्यता तेनैव उपदिष्टाऽस्मि ?

हा भग्ना मे मनोरथाः । शिथिलीभूतश्च आत्मविश्वासः । कामं सेनया कोऽपि अधिपतिर्मन्येत, कामं कोऽपि तैलङ्गणानां मालवानां वा प्रभुः स्यात्, काममहं सर्वथा जीवन्मुक्ताऽपि भवेयम्, तथाऽपि मुञ्जस्य पृथिवीवल्लभत्वम् अक्षतमेवाभाति ।

अहो सुमहत् तस्य प्रभावशालित्वम्, प्रचण्डः प्रतापः, अनन्यसाधारणं च व्यक्तिमत्त्वम्, येन विद्विषन्तोऽपि हर्षिता गापिता नर्तिताश्च तैलङ्गणजनाः । अहं च प्रतापिनी राजनीतिनिपुणा भयकारिणी च सती अपि ह्रेपिता क्षुद्रतां च अनुभाविता ।

हा दह्यन्ते अङ्गानि, विलुप्यते चेतना, भ्राम्यति च चित्तम् । ( उत्थाय इतस्ततो विचरति, गवाक्षं व्रजति प्रत्यागच्छति च मञ्चकम् । ) हा सर्वथा विमूढा अशरणा चास्मि । न चास्ति कश्चिज्जनो यस्मै निवेद्य परिभवदुःखं सह्य-वेदनं करोमि । भवतु, मनःशान्त्यर्थं ध्यानमेव कर्तव्यम् ( अक्षिणी निमील्य )

**कामक्रोधादिनिर्मुक्तं त्वच्चिन्तनपरायणम् ।**
**निर्मलं कुरु मे चित्तं कामान्तक शिव प्रभो ॥ १ ॥**

हा कथं न निःसरति नयनपथात् तस्य दुरात्मनो वदनम् । यत्र तत्र सर्वत्र तदेव दरीदृश्यते । न च केनापि उपायेन विस्मर्यते नेत्रपथाद् अपसार्यते वा । कथमिदानीमपि दृश्यते तस्य दह्यमानहस्तस्य अपि प्रशान्तं सस्मितं तेजस्वि च मुखम् । ( कञ्चित्कालं ध्यानस्था उपविशति, ततश्च शय्यामधिशेते । पुनः पुनः कुक्षिपरिवर्तनं करोति अचिराच्च निद्रिता भवति । )

हा कथं पुनरागतः स नरपिशाचः । आः पापिन्, अपेहि । कथं मां संन्यस्तसकलसुखां निष्कलङ्कचेतसं च स्पृशन् न अपत्रपसे ? अपेहि । नो चेत्, न केवलं हस्तं किन्तु त्वाम् आपादमस्तकं दाहयिष्यामि । ( किञ्चित् स्तब्ध्वा ) भोः, मा खलु मा खलु दूषय मे पावित्र्यम् । बहूनि हि सन्ति ते रम्यकलत्राणि । कृपया मुञ्च माम्, मुञ्च माम् । हा कथं न मुञ्चति, आलिङ्गितुं च प्रयतते कामुकः । कथं मे हस्तौ पादौ च निष्प्राणौ जातौ । अहो दारुणं मे दौर्बल्यं यत् प्रतिकारमपि कर्तुं न पारयामि । ( ईषत् संस्तभ्य ) अहो मधुरोऽयं स्पर्शः, अपूर्वश्च अनुभवः । मुञ्च, मुञ्च, मुञ्च माम् । सर्वथा विजिताऽस्मि त्वया । यतसत्यं त्वमेव पृथिवीवल्लभः, न च कश्चिदन्यः ।



( अवबुध्य ) क्व नु गतोऽसौ प्रियदर्शनः ? ( इतस्ततो विलोक्य ) कथं स्वप्न एव मया दृष्टः ? अपि जागृताऽस्मि, सुप्ता वा ? ( हस्तेन ललाटं वक्षश्च पीडयति, अक्षिणी च मर्दयति । ) अहो सुमहत् स्थित्यन्तरं प्राप्ताऽस्मि ! सर्वथा शिथिलीभूतः इन्द्रियनिग्रहः । दासीकृता चास्मि पुष्पधन्वना । हन्त शान्तोऽधुना मनस्तापः । सुखितानि गात्राणि । अपगता चिन्ता । आसादिता च शान्तिः । मृता हि सा तपस्विनी मृणालवती । इयं च नूतना सुखार्थिनी मृणालवती सञ्जाता । अहो महान् मे विनिपातः, गङ्गाया इव महादेवमस्त-कात् । किमिदानीं करोमि ? किं वदेत् तैलपः ? किं च भणेयुः प्रजाः ? भोः सर्वशक्तिमन् परमेश्वर, त्वमेव मे शरणं हतबलायाः । ( शय्याम् अधिशेते । )

**इति प्रथमः प्रवेशः ।**

---

## द्वितीयः प्रवेशः ।

**स्थलम्**—भिल्लमस्य उद्यानम् ।
**समयः**—तृतीयः दिवसः । प्रातःकालः ।
[ रसनिधिः इतस्ततो विचरन् दृश्यते । ]

**विलासवती**—( प्रविश्य सविस्मयम् ) कथं कविराजः ?

**रसनिधिः**—अथ किम् ।

**विलासवती**—किं नाम क्रियते ?

**रसनिधिः**—आर्यभिल्लमवर्णनपरं श्लोकाष्टकं रच्यते ।

**विलासवती**—अपि अहर्निशं काव्यरचना एव क्रियते ?

**रसनिधिः**—न अहर्निशम् । तथाऽपि कालविशेषे क्रियते ।

**विलासवती**—अपि रोचते अत्र निवासः ? कथ्यतां यदि किञ्चिद् इष्यते ।

**रसनिधिः**—यन्मया इष्यते तन्नात्र लप्स्यते कथञ्चित् ।

**विलासवती**—मा एवम् । तातं विज्ञाप्य सर्वमपि भवान् प्राप्स्यति ।

**रसनिधिः**—मुग्धे, बाला हि त्वम् । कथं सर्वमपि प्राप्स्यते ? क्व मालवदेशः क्व च तैलङ्गणदेशः ?

**विलासवती**—कविराज, किं नाम न्यूनं तैलङ्गणेषु? न खलु भवता सम्यग् दृष्ट एष देशः। अत एवमुच्यते।

**रसनिधिः**—कामं स्वर्णमयः तैलङ्गणदेशः। किं तु मम तेन? अवन्तिवासिनः प्रियाः पौराः, महाकालेश्वरमन्दिरघण्टानां गगनभेदी नादः, पितॄणां च पवित्रा दाहभूमिः—कथमेतत् सर्वमत्र लप्स्यते?

**विलासवती**—अम्बा अपि असकृद् एवमेव भाषते। तस्यै अपि स्वदेशादन्यत्र नैव कुत्रापि रोचते वासः।

**रसनिधिः**—युज्यते एव।

**विलासवती**—सा तु राज्ञी आसीत्। अत एव विदेशे दुःखिता भवति। भवान् तु तत्रापि कविरभवत्, अत्रापि च कविरेवास्ति। अपि च, मुञ्जराजादपि तातः भवन्तमधिकं सम्भावयेत्।

**रसनिधिः**—विलासवति, परजनमित्रभावात् स्वजनसेवाऽपि श्रेयसी।

**विलासवती**—कविराज, नैतद् युक्तं मन्ये।

**रसनिधिः**—यतः त्वया स्वजनपरजनयोः भेद एव न ज्ञायते।

**विलासवती**—भवतु। कविराज, अद्य भवन्तं किञ्चित् प्रष्टुमिच्छामि।

**रसनिधिः**—विना सङ्कोचं प्रष्टुमर्हसि।

**विलासवती**—अपि परिणीतो भवान्?

**रसनिधिः**—अथ किम्।

**विलासवती**—तद् भवन्मनसा भार्यायाः स्मृतिभिः सङ्कुलेन भाव्यम्।

**रसनिधिः**—सत्यमुक्तं त्वया। न खलु अहं त्वमिव त्यागवृत्तिम् अध्येतुकामः।

**विलासवती**—अत एव भवता दुःखमनुभूयते।

**रसनिधिः**—विलासवति,

> **विरहशोकविवर्जनकाङ्क्षया कठिनतां प्रतिपाद्य मनो निजम्।**
> **प्रियजनस्मरणत्यजनं मया समुचितं न मनागपि मन्यते ॥ १ ॥**

**विलासवती**—किं नाम विरह इति?



**रसनिधिः**—यो हि स्नेहं जानीते स एव विरहं जानीयात्।

**विलासवती**—कविराज, सत्यं वदामि। कञ्चित् कालं भवान् तपः तप्तुमर्हति, येन चित्तशान्तिरधिगम्येत।

**रसनिधिः**—किं मे अनया हठाकृष्टया चित्तशान्त्या? कामम् अशान्तं मे चित्तम्। तत्तु नैव तथा कारणं विना। तत् किं निरर्थकनिग्रहेण? मम पत्नी त्वया एव समवया भवति। नूनं सा तपस्विनी नक्तन्दिवम् अश्रुमोचनपरा स्यात्। अपि तस्याम् एवं दुःखमनुभवन्त्यां मया शान्त्यर्थं निर्विकारतां प्राप्य तपश्चरणम् अनुष्ठेयम्? या सुखं ददाति तस्या अर्थे दुःखसहनमपि सुखाय एव कल्पते।

**विलासवती**—कविराज, क्षम्यतां मे धाष्टर्यम्। किन्तु भ्रान्तिमयो भाति मे अयं विचारः। किं नाम सुखम् अन्यद् दुःखाभावात्?

**रसनिधिः**—नहि नहि, अयुक्तमेतत्। न खलु ज्ञायते त्वया सत्यस्वरूपं सुखस्य। सुखं नाम न केवलो दुःखाभावः न वा सन्तोषः। सुखं नाम शरीरमनसोः सकलभावोर्मीणां मुक्तनृत्यम्। अपि कदाचित् त्वया प्रभाते विहगकूजनं श्रुतम्? तदेव नाम सुखम्।

**विलासवती**—कथं पुनर्लभ्यं सुखमेतत्?

**रसनिधिः**—तद् अचिरादेव ज्ञास्यसि। कच्चित्ते विवाहः कुमारेण सह निश्चितोऽस्ति?

**विलासवती**—अथ किम्।

**रसनिधिः**—अपि तस्य दर्शनेन सानन्दभरं नृत्यति ते हृदयम्?

**विलासवती**—कथमेतत् सम्भवेत्? संयमशीलौ हि आवाम्।

**रसनिधिः**—अपि कदाचित् तस्य स्पर्शाय वचःश्रवणाय वा स्पृहयति ते मनः?

**विलासवती**—विरलमेव।

**रसनिधिः**—तत् कथं ज्ञास्यते त्वया सुखं दुःखं वा? विलासवति, सर्वथा भावशून्यम् एव ते हृदयम्।

**विलासवती**—कविराज, किन्नामधेया भवतः सहधर्मिणी ?

**रसनिधिः**—उदयवती ।

**विलासवती**—अहो मधुरम् अभिधानम् ! अपि साऽपि काव्यस्य रसज्ञा ?

**रसनिधिः**—न केवलं रसज्ञा किन्तु रचनापटुरपि ।

**विलासवती**—एवम् ? तर्हि देवतोपमा एव स्यात् ।

**रसनिधिः**—यत्सत्यं देवदुर्लभा एव ।

**विलासवती**—कविराज, अहमपि तया सदृशी भवितुमिच्छामि । अपि भवान् काव्यानि श्रावयित्वा मामपि रसाभिज्ञां कुर्यात् ?

**रसनिधिः**—सानन्दं श्रावयिष्यामि ।

**विलासवती**—भवतु, अयम् आयाति सुहृद् भवतः । अतो गच्छामि ।
[ निष्क्रान्ता । ]

**धनञ्जयः**—( प्रविश्य ) जयतु भोजराजः, न-न रसनिधिः ।

**रसनिधिः**—आगम्यतां कविराज, अस्ति कश्चिद् वार्ताविशेषः ?

**धनञ्जयः**—कुमार, अद्य किल राजसभायां तैलपः मुञ्जमहाराजं पादप्रक्षालनम् आज्ञापयिष्यति । यदि च महाराजेन तथा न क्रियेत तदा तस्य वधोऽपि आदेक्ष्यते ।

**रसनिधिः**—तातस्तु न कदापि तथा करिष्यति इति निश्चितमेव ।

**धनञ्जयः**—अत एव बाधते चिन्ता । न खलु ज्ञायते किं विधेयमिति ।
[ उभौ अपि कञ्चित् कालम् इतस्ततः सचिन्तं परिभ्रमतः । ]

**लक्ष्मीः**—( प्रविश्य ) जयतां जयतां कविराजौ । ( निर्वर्ण्य ) कथं चिन्ताकुलौ भवन्तौ ? किं न सुखावहः अत्र निवासः ?

**धनञ्जयः**—आर्ये,

**यावन्नो जीवनाधारो रुद्धस्तिष्ठति बन्धने ।**
**कथं तावत् सुखं नः स्यात् स्वर्गे निवसतामपि ? ॥ २ ॥**

**लक्ष्मीः**—कविवरौ, दुर्भाग्यात् साम्प्रतम् अशुभानि एव लक्षणानि । अद्यैव श्रुतं मया भर्तृमुखात्—



**रसनिधिः**—किं नाम श्रुतम् ?

**लक्ष्मीः**—येन केनापि निमित्तेन अचिरादेव मुञ्जराजं निहन्तुं कृतनिश्चयः तैलपराजः ।

**रसनिधिः**—सत्यमेव ?

**लक्ष्मीः**—अथ किम् । [ रसनिधिः धनञ्जयश्च निःश्वसितः । रसनिधिः वक्षः प्रसारयति अधरं च दशति । धनञ्जयः अवाङ्मुखः तूष्णीं तिष्ठति । ] किं नाम चिन्त्यते कविसत्तमौ ?

**धनञ्जयः**—( सशोकावेगम् ) आर्ये, अस्तङ्गतः खलु अस्माकं भाग्यसूर्यः !

**लक्ष्मीः**—न अद्यापि गतः । अस्ति एव हि कश्चित् कालावधिः । ( तौ उपेत्य अतिमन्दस्वरेण ) किम् अस्ति साहसं मुञ्जराजं विमोचयितुम् ? [ धनञ्जयः चकितं परावर्तते । रसनिधिः साश्चर्यं तीक्ष्णदृष्ट्या च लक्ष्मीदेव्या मुखं निरीक्षते । विहस्य ] भोः, मया खलु परिहास एव कृतः ।

**रसनिधिः**—आर्ये, कामं महाराजस्य मुक्तिः अत्रभवत्याः परिहासविषयीभूता । अस्माभिस्तु सा अत्युत्कटम् इष्यते । किं पुनः कुर्मः ? अपरिचितः अयं देशः, अपरिचिताश्च जनाः । कस्मै खलु कथयेम स्वां व्याकुलताम् ? बन्दिनो हि वयम् ।

**लक्ष्मीः**—मा मा एवम् । कविराजौ, किमत्र भवद्भिः बन्दिवद् उष्यते ?

**रसनिधिः**—कामं न वयं बन्दिनः । तथाऽपि—

**प्राणसमानेऽस्माकं दुःस्थितिमापन्न ईदृशीं नाथे ।**
**कर्तुं न पारयामो बन्दिन इव निर्बलाः किञ्चित् ॥ ३ ॥**

आर्ये, किं कुर्मः ? विदेशे अस्मिन् नास्ति कोऽपि सहायः । अन्यथा—

**लक्ष्मीः**—अन्यथा किं करिष्यथ ?

**रसनिधिः**—यद् इदानीमेव उक्तम् अत्रभवत्या । मुञ्जराजं विमोचयिष्यामः ।

**लक्ष्मीः**—रसनिधे, अपि कश्चित् तैलपहस्ताद् अपसर्तुं समर्थः ?

**रसनिधिः**—आर्ये,

**सहस्रहस्तोऽपि पराजितोऽभूत् पुरा प्रतापी किल कार्तवीर्यः ।**
**का तर्हि वार्ता द्विकरान्वितस्य तैलङ्गणेशस्य सुदुर्बलस्य ? ॥ ४ ॥**

**लक्ष्मीः**—( सस्मितम् ) कविराज , नैतत् काव्यविरचनम् ।

**रसनिधिः**—सत्यमुक्तं भवत्या । अत्र हि काव्यानां विषयः कृतौ परिवर्तनीयोऽस्ति ।

**लक्ष्मीः**—तत् क्रियतां तथा ।

**रसनिधिः**—तत्र तु एक एवास्ति अन्तरायः ।

**लक्ष्मीः**—को नाम ?

**रसनिधिः**—नास्ति तत्र कस्यापि मार्गदर्शकस्य साहाय्यम् । (किञ्चित् संस्तभ्य) अपि तद् अत्रभवत्या करिष्यते ?

**लक्ष्मीः**—साहाय्यं तावद् भगवान् पिनाकपाणिः सदैव करिष्यते । महान् खलु प्रभावः अस्य प्रासादसमीपवर्तिनो महादेवस्य । अपि ज्ञायते किञ्चित् तमन्तरेण ?

**रसनिधिः**—नैव जानामि ।

**लक्ष्मीः**—स किल प्रत्यहं रात्रौ नगराद् बहिर्वर्तमानं भुवनेश्वरं द्रष्टुं प्रयाति ।

**रसनिधिः**—कथं प्रयाति ?

**लक्ष्मीः**—महान् किल तस्य नन्दिनः प्रभावः । स हि मन्दिराद् अदृश्यो भूत्वा पातालमार्गेण भुवनेश्वरमन्दिरं प्रयाति । अथ मुञ्जराजः तत्रागत्य बिल्वपत्रं समर्पयेत् तदा अचिरादेव नगरात् निष्क्रम्य अवन्तिमार्गस्थो भवेत् ।

**रसनिधिः**—( विचार्य ) एवम् ! अपि सनिश्चयम् एतदुच्यते ?

**लक्ष्मीः**—बाढम् । मुञ्जस्य तत्र आगमनं तु आवश्यकम् ।

**रसनिधिः**—तत्तु तदैव सम्भवेद् यदि भगवता त्रिशूलधारिणा खनित्रादीनि उपकरणानि प्रेष्यन्ते ।

**लक्ष्मीः**—रसनिधे, अद्भुता हि ते कल्पनाशक्तिः ।

**रसनिधिः**—अत एव कविर्भूतोऽस्मि । भवतु । मातः, उपदिश्यतां कश्चित् शिवप्रसादनोपायः ।

**लक्ष्मीः**—रसनिधे, अस्ति वज्रसमं हृदयम् ?

**रसनिधिः**—अथ किम् ।



तैलपः जकलादेवीसमन्वितः ।



**लक्ष्मीः**—तदेहि । ( एकतो गत्वा साङ्गुलिनिर्देशम् ) किं दृश्यते तस्य वृक्षस्य अधस्तात् ?

**रसनिधिः**—खनित्रादीनि उपकरणानि ।

**लक्ष्मीः**—भवतु । दृश्यताम् इदानीम् असौ वृक्षसमूहः । तस्यान्तरे स्थितात् कूपाद् आरभ्य राजप्रासादं यावत् सुरङ्गामार्गो वर्तते । यत्र च मुञ्जराजो निक्षिप्तोऽस्ति तद् भूमिगृहं नातिदूरम् अस्मात् सुरङ्गापथात् ।

**रसनिधिः**—एवम् ?

**लक्ष्मीः**—एवम् आवश्यकं महादेवस्य प्रसादनम् । भवतु, गच्छामि अधुना । प्रासादं गतेन आर्यपुत्रेण प्रतिनिवृत्तेन भाव्यम् ।

**रसनिधिः**—मातः, सुतराम् अनुगृहीता वयम् अत्रभवत्या । न खलु ज्ञायते कथं भवत्या आनृण्यं प्राप्नुयाम ?

**लक्ष्मीः**—( सस्मितम् ) सर्वमपि यथाकालं ज्ञास्यते एव । [ निष्क्रान्ता । ]

**रसनिधिः**—भवतु । कविराज, अद्यैव रात्रौ खनित्रप्रयोगम् आरभेमहि ।

( उभौ निष्क्रान्तौ । )

**इति द्वितीयः प्रवेशः ।**

---

## तृतीयः प्रवेशः ।

**स्थलम्**—तैलपस्य राजसभा ।

**समयः**—तृतीयः दिवसः । सायङ्कालः ।

[ केचित् सामन्ताः, केचिद् राजपुरुषाः, केचित् नागरिकाः, चारणः, रसनिधिः, धनञ्जयः, पद्मगुप्तश्च उपविष्टाः दृश्यन्ते । ]

**प्रथमः नागरिकः**—( जनान्तिकम् ) अद्य किल पादप्रक्षालनविधिः भविष्यति ।

**द्वितीयः नागरिकः**—अपि नाम मुञ्जः पादप्रक्षालनं कुर्यात् महाराजस्य ?

**प्रथमः नागरिकः**—यदि कुर्यात् तदा साधु स्यात् । महाराजयशोऽपि वर्धेत, मुञ्जश्च न हन्येत । नूनम् असाधारणः खलु असौ पुरुषः ।

**द्वितीयः नागरिकः**—सत्यमाह भवान् । न तु मानधनोऽसौ तथा करिष्यति इति मन्ये ।

[ नेपथ्ये ]

शान्तिरवलम्ब्यतां शान्तिरवलम्ब्यतां सकलैः सभास्तारैः । सकलभुवनाश्रयः सत्याश्रयकुलतिलकः भुजबलचक्रवर्ती परमभट्टारकः महाराजाधिराजः पृथिवीवल्लभः तैलपमहाराजः राजसभां प्रविशति ।

[ ततः प्रविशति तैलपः भिल्लमेन अकलङ्कचरितेन च अनुयातः । सर्वे सभासदः उत्तिष्ठन्ति । तैलपः सिंहासने उपविशति । पार्श्ववर्तिद्वारेण मृणालवती, जक्कलादेवी लक्ष्मीदेवी च प्रविश्य स्थानासीनाः भवन्ति । सभासदः तैलपं प्रणम्य उपविशन्ति । ]

**प्रथमः नागरिकः**—( जनान्तिकम् ) आर्य, अपि दृष्टम् अत्रभवता मृणालमातुः भीषणं मुखम् ?

**द्वितीयः नागरिकः**—बाढम् । तन्निश्चित एवाद्य मुञ्जस्य वधः ।

**चारणः**—

जयतु जयतु देवस्तैलपः शौर्यशैलो
भुजबलजितलोकः कम्पिताशेषशत्रुः ।
त्रिभुवनमणिरेकः पुण्यशीलो महात्मा
सुरपतिरपि नूनं यच्छ्रिया साभ्यसूयः ॥ १ ॥

**तैलपः**—( श्मश्रूणि सम्पीड्य ) आनयत एकैकं युद्धबन्दिनः । [ ततः प्रविशति सैनिकाभ्याम् आनीयमानः पश्चाद्बद्धहस्तः मुक्तकेशः प्रसन्नवदनश्च मुञ्जः । सर्वेषां दृष्टयः तस्मिन् एव स्थिरा भवन्ति । मृणालवती कञ्चित्कालं तम् अनिमिषनेत्राभ्यां निरीक्षते, ततो मुखम् अन्यत्र परिवर्तयति नेत्रे च अन्यत्र व्यापारयति, मुहुर्मुहुस्तु मुञ्जमुखम् एव प्रेक्षमाणा आस्ते । ] भिल्लमराज, क्व ते मालवकवयः ?

**भिल्लमः**—( साङ्गुलिनिर्देशम् ) इमे अत्र उपविष्टाः ।

**तैलपः**—तदिदानीं गाप्यन्तां मे यशः ।



निखिलगुणिजनानामाश्रयस्थानमेकं
सकलजनहृदां च प्रीतिपात्रं परं यः।
अनुपममहिमा न क्षीयते यस्य जातु
जयतु जयतु पृथ्वीवल्लभोऽसौ नृपेन्द्रः॥ (पृष्ठम् ३९)



भिल्लमः—यथाऽऽज्ञापयति देवः। (रसनिधिम् उपेत्य) कविराज, देवः यशोगानम् आदिशति। तद् गीयताम्।

रसनिधिः—(धनञ्जयं प्रति) धनञ्जय, वल्लभो भवान् सरस्वत्याः। अतो भवान् एव गातुमर्हति।

धनञ्जयः—यथाऽऽह भवान्। (सिंहासननिकटं गत्वा तिष्ठति।)

मुञ्जः—धनञ्जय, तथा गीयतां यथा अवन्तिकीर्तिः अक्षता स्यात्।

तैलपः—(सावज्ञम्) रे कविब्रुव, किं ते नामधेयम्?

मुञ्जः—कथम् इदमपि न ज्ञायते तैलपेन?

**आकर्ण्य यस्य कवितामम्तोपमानां**
**वीणां जहाति सहसैव सरस्वती सा।**
**यो नाम वेत्ति नहि तस्य धनञ्जयस्य**
**मग्नः स नूनमबुधो निरयान्धकारे॥ २॥**

तैलपः—(सरोषम्) मूर्ख, असौ मया पृष्टः, न त्वम्। अपि बधिरोऽसौ यत् तस्यार्थे त्वया भाष्यते?

मुञ्जः—किन्तु विनयशीलः सभ्यजनसभायाम् आत्मगुणवर्णनं कर्तुं नैव शक्नोति इत्येव प्रोक्तवान् अहम्।

तैलपः—(धनञ्जयं प्रति) आरभस्व गीतम्।

धनञ्जयः—(प्रणम्य)

**महादेवं महाकालं महीतलविभूषणम्।**
**महापापनिकायघ्नं नमामि समहादरम्॥ ३॥**

**निखिलगुणिजनानामाश्रयस्थानमेकं**
**सकलजनहृदां च प्रीतिपात्रं परं यः।**
**अनुपममहिमा न क्षीयते यस्य जातु**
**जयतु जयतु पृथ्वीवल्लभोऽसौ नृपेन्द्रः॥ ४॥**

तैलपः—(आत्मगतं सरोषलवम्) न खलु ज्ञायते कः अनेन स्तुतः, अहं वा मुञ्जो वा? (प्रकाशम्) साधु साधु। गृह्यतां निजमासनम्। (धनञ्जयः

स्वीयम् आसनं गृह्णाति । ) मुञ्ज, सम्यक् प्राप्तस्त्वया पापकर्मणां विपाकः । नष्टा हि ते राजलक्ष्मीः ।

**मुञ्जः**—कः एवं वदति ?

**तैलपः**—अहं वदामि । [ मुञ्जः केवलं हसति । ] मुञ्ज, अधुना एक एवास्ति ते सम्भावितजीवनोपायः ।

**धुन्वन्तौ सकलां पृथ्वीं प्रक्षाल्य चरणौ मम ।**
**याचस्व स्वापराधानां पापात्मन् सम्प्रति क्षमाम् ॥ ५ ॥**

[ सैनिकौ मुञ्जहस्तौ विशृङ्खलौ कुरुतः । एकः सामन्तः जलपूर्णं सुवर्णपात्रम् आदाय मुञ्जम् उपैति । तैलपोऽपि स्वचरणं पादपीठे निदधाति । मुक्तहस्तो मुञ्जः प्रततवक्षाः सगर्वं तिष्ठति । ]

**सामन्तः**—ऐतु मुञ्जराजः । प्रक्षाल्येतां देवस्य चरणौ ।

**मुञ्जः**—भोः सामन्त,

**ताण्डवेन भुवनं विधुन्वतः कुत्र पादयुगलं शिवस्य तत् ।**
**क्षालनेन खलु यस्य पावनो भूय एष पृथिवीप्रियो भवेत् ? ॥ ६ ॥**

**तैलपः**—( सभ्रूभङ्गम् ) धिक् पामर, अलं प्रलापेन । भिल्लमराज, किमिति चिरयति एष नराधमः ?

**भिल्लमः**—( मुञ्जम् उपेत्य ) भोः अवन्तिनाथ, प्रक्षाल्यतां तैलपमहाराजस्य चरणयुगलम् । अधिकार एवैष परम्परागतो विजेतॄणाम् ।

**मुञ्जः**—( विहस्य ) भोः स्यूनराज, किमाह भवान् ? तैलपचरणौ प्रक्षालयामि ? अपि भ्रान्तचित्तो भवान् ?

**प्रक्षाल्य पादयुग्मं मम भूयो यस्य सार्द्रतां यातौ ।**
**शोषं गतौ न हस्तौ तच्चरणौ क्षालयामि कथम् ? ॥ ७ ॥**

**तैलपः**—( सक्रोधम् ) अरे मदोन्मत्त, किम् अद्यापि न विलुप्तस्ते दर्पः ?

**मुञ्जः**—( विहस्य ) किम् एवं हठात् प्राप्यते पृथिवीवल्लभत्वम् ?

**तैलपः**—( सक्रोधम् उत्थाय ) आः दुरात्मन्, तिष्ठ तिष्ठ । [ इतस्ततः चक्षुषी व्यापारयति । सभ्याः उत्तिष्ठन्ति । ] सामन्ताः, किमिति तूष्णीं



स्थीयते ? गृह्यताम् अयं पापात्मा, कार्यतां च तेन मे पादप्रक्षालनम् । [ केचित् सामन्ताः मुञ्जम् उपसर्पन्ति । मुञ्जः प्रततशरीरः अनिमेषनेत्रः सगर्वहास्यवदनश्च सर्वान् सावज्ञम् अवलोकमानः तिष्ठति । मृणालवती सचिन्तम् अवलोकते । सामन्ताः पुनः पुनः तैलपं प्रति लोचने व्यापारयन्ति । दन्तान् निष्पिष्य ] हा धिग् युष्मान् कातरान् केवलम् अवलोकमानान् ! अकलङ्कचरित, किं त्वमपि निष्प्रभोऽसि ?

[ अकलङ्कचरितः अन्ये सामन्ताश्च पुनरपि मुञ्जहस्तं ग्रहीतुम् उपसर्पन्ति । ]

**मुञ्जः**—( विहस्य ) आगम्यतां सामन्ताः । किमिति भयाकुलाः ? ( कराघातेन सामन्तान् परापातयति । सभायां कोलाहलः जायते । )

**तैलपः**—( सक्रोधभरम् ) हा धिक् । हा धिक् । किं पश्यथ रे यूयं नपुंसकाः ? [ सामन्ताः पुनर् अभिपत्य मुञ्जहस्तं गृह्णन्ति तं च सिंहासनान्तिकम् आक्रष्टुम् आरभन्ते । मृणालवती आसनाद् उत्तिष्ठति । मुञ्जः सहसा उत्प्लवते आत्मानं च कर्षतां सामन्तानां हस्तेभ्यो विमोचयति । ततश्च सः अभ्येत्य सुवर्णपात्रधारिणं सामन्तं स्कन्धेन प्रहरति । तेन सुवर्णपात्रं तस्य हस्तात् प्रभ्रश्य तैलपशरीरे निपतति क्लेदयति च तस्य वस्त्राणि । तैलपः निपतन्तं मुकुटं हस्तेन स्थिरीकरोति । मुञ्जः प्रोच्चैः विहसति । महान् जायते कोलाहलः । ओष्ठं दष्ट्वा खड्गं च आकृष्य ] रे दुष्ट पापिन्, अयं न भवसि । सामन्ताः, अविलम्बितं हन्यताम् अयं दुरात्मा । [ सामन्ताः खड्गान् आकृष्य प्रहारोद्यताः तिष्ठन्ति । मुञ्जो निर्भयः क्रुद्धमुखश्च तिष्ठति । ]

**मृणालवती**—( सहसा समुपसृत्य ) हा धिक् । किम् एतत् क्रियते ? कथं निःशस्त्रं नरेशम् अभिपतन्तो न लज्जिताः सर्वे ? न खलु एष वीराणां किन्तु कातराणाम् एव धर्मः । न हि अनेन तैलङ्गणयशः वर्धेत किन्तु धूलिसादेव भवेत् । तैलपराज, किं सदृशम् एतत् ते धर्मशीलस्य ? सामन्ताः, कोशगतान् कुरुत सज्जितान् खड्गान् । [ सामन्ताः खड्गान् कोशगतान् कुर्वन्ति । ] भोः सभ्याः, अवसितं सभाकार्यम् । मुञ्जविषये निर्णयः आयतौ यथाकालं करिष्यते । [ सर्वे निष्क्रान्ताः । ]

इति तृतीयः अङ्कः ।

---

# चतुर्थः अङ्कः ।

## प्रथमः प्रवेशः ।

**स्थलम्**—भूमिगृहम् ।

**समयः**—पञ्चमः दिवसः । निशीथकालः ।

[ मुञ्जः उपविष्टः बद्धाञ्जलिः गायति । ]

**मुञ्जः**—

यस्य प्रसादादिह शर्मधाम्नः कालो व्यतीतः सुखमद्ययावत् ।
इतः परं चापि तथैव यायाद् वन्दे महाकालमुमापतिं तम् ॥ १ ॥
यस्य प्रभावाद् विजिता विपक्षाः साम्राज्यमृद्धं सुमहच्च भुक्तम् ।
निषेवितः शास्त्रकलारसश्च वन्दे महाकालमुमापतिं तम् ॥ २ ॥
सुखं न शिष्टं न यदन्वभावि न पौरुषं चापि न यद् व्यधायि ।
उभे च लब्धे यदनुग्रहेण वन्दे महाकालमुमापतिं तम् ॥ ३ ॥
येन प्रदत्तं सकलं प्रभूतं सुखं च दुःखं च मयाऽनुभूतम् ।
प्राप्तं समत्वं मनसश्च तेन वन्दे महाकालमुमापतिं तम् ॥ ४ ॥
यदिच्छया मन्ददरो विपत्सु सम्पत्सु मन्दादरतां च यातः ।
वाञ्छामि वीरोचितदेहपातं वन्दे महाकालमुमापतिं तम् ॥ ५ ॥

[ प्रणम्य शय्याम् अधिशेते । अचिरादेव भूमिगर्भाद् आघाताः श्रूयन्ते । सरभसम् उत्थाय एकतः प्रसारितवक्षाः तिष्ठति । आत्मगतम् ] अपि कश्चिद् घातकोऽयं तैलपेन प्रेषितः ? ( सहास्यम् ) किं न किञ्चन उपायान्तरं प्राप्तं वराकेण?

[ भूमिगर्भात् पाषाणम् उत्सार्य भोजः मुखम् उत्क्षिपति । ]

**भोजः**—तात ।

**मुञ्जः**—को भवान् ?

**भोजः**—अहं भोजः । ( आलातं प्रज्वाल्य उन्नमयति । )

**मुञ्जः**—( सविस्मयम् ) कथं भोजः ! [ भोजः भूगर्भात् निष्क्रम्य मुञ्जं प्रणमति । तं परिष्वज्य ] वत्स, कथम् अत्रागतः ? [ भूगर्भात् धनञ्जयः पद्मगुप्तश्च निष्क्रामतः । ] कथं धनञ्जयः पद्मगुप्तश्चापि ! किं नाम एतद् आरब्धं युष्माभिः ?



**भोजः**—तात, भवन्तं मोचयितुम् आगताः ।

**मुञ्जः**—भोज, कथं तु परश्वः राजसभायां त्वं कविमण्डलगतो दृष्टः ?

**भोजः**—तात, भवति बन्दिग्राहं गृहीते भग्ने च सेनाव्यूहे वेषान्तरं विधाय कविवृन्दं प्रविष्टः ।

**मुञ्जः**—चिन्तितश्च मद्विमोचनोपायो नु ? वत्स, किमिति एवमात्मा संशये पातितः ?

**भोजः**—कथं भवता विना जीवेम वयम् ?

**मुञ्जः**—( सस्मितम् ) मूढ, तत् त्वं कदा राज्यं करिष्यसि ?

**भोजः**—नैव स्पृहयामि राजलक्ष्म्यै ।

**मुञ्जः**—( सहासम् ) अपि स्मर्यते यन्मया घातकेषु प्रहितेषु त्वया प्रोक्तमासीत् ' नैकेनापि समं गता वसुमती मुञ्ज त्वया यास्यति ' इति ?

**भोजः**—तथापि जीवति ताते नाहं वसुमतीम् अभिलषामि । भवतु, इदानीम् अविलम्बम् आगम्यताम् अस्माभिः समम् । ( सुरङ्गामार्गं प्रदर्श्य ) एष सुरङ्गामार्गः ।

**मुञ्जः**—कथं तु मां मान्यखेटपुराद् बहिर्नेष्यसि ?

**भोजः**—कृतपूर्व एव सकलः प्रबन्धः । प्रहरार्धेन एव अवन्तिमार्गस्था भविष्यामः । न पुनरिदानीम् अल्पोऽपि कालक्षेप उचितः ।

**मुञ्जः**—वत्स, किमर्थं कृतोऽयं प्रयासः ?

**भोजः**—तात, नैष समयः सम्भाषितुम् ।

**मुञ्जः**—कथं नैष सम्भाषणसमयः ! कदा नु खलु लभ्येत ईदृग्विधं गोष्ठीसुखम् !

**भोजः**—यदि तु कश्चिदागच्छेत् तदा ग्रहीष्यामहे ।

**मुञ्जः**—तत् किम् इतो निष्क्रामन्तो नैव ग्रहीष्यामहे ? कविराज, कथम् इतो निष्क्रमणं भयरहितं मन्यते ?

**धनञ्जयः**—देव, इतो नातिदूरे एव अन्यः सुरङ्गापथः प्राप्तोऽसि, येन नगराद् बहिर्गन्तुं शक्यते ।

**मुञ्जः**—( विहस्य ) किं सुरङ्गापथप्राप्तिरेव पर्याप्ता ? कविराज, कथं भवानपि भ्रमाभिभूतः ? किं विस्मृतम् अत्रभवद्भिः अमात्यरुद्रादित्यस्य भविष्यत्कथनं पृथिवीवल्लभः सकृदेव गोदावरीम् उल्लङ्घयिष्यति इति ? साम्प्रतम् उल्लङ्घितवान् अहं गोदावरीम् ।

**भोजः**—तात, न मे विश्वासो भविष्यत्कथने । भगवतो भास्कराचार्यस्यापि वितथीभूतं भविष्यत्कथनम् । का तर्हि कथा अमात्यरुद्रादित्यस्य ? अपि तस्य वचने विश्वस्य अत्रैव निवस्तुमिष्यते ? तत् त्वर्यताम् ।

**मुञ्जः**—( सस्मितम् ) वत्स, अलम् एतेन त्वरातिशयेन । ( द्वारसमीपतः पदशब्दः श्रूयते । ) शृणुत । कश्चिद् आयातीव । सत्वरं सुरङ्गान्तरितैः भूयताम् । समाहूतैश्च पुनरागम्यताम् । [ भोजः धनञ्जयः पद्मगुप्तश्च सुरङ्गां प्रविशन्ति । ततो मृणालवती प्रविशति द्वारे एव च अवाङ्मुखी तिष्ठति । ] आगम्यतां प्रिये मृणालवति, स्वागतं ते । कथं दूरे एव स्थीयते ? ( तामुपेत्य ) कृतम् इदानीम् अपत्रपया । नास्ति ते कश्चित् मोचनोपायो मम बाहुपाशात् । ( बाहू प्रसारयति । )

**मृणालवती**—( परावृत्य ) भोः पृथिवीवल्लभ, रक्ष अविनयम् ।

**मुञ्जः**—अयि वल्लभे, मा भैषीः । अद्ययावद् गतचेतना साम्प्रतं प्राप्तजीवना असि । ( सस्मितं सालीककोपं च प्रतीकारं कुर्वाणां मृणालवतीं बलाद् बाहुपाशे गृह्णाति । ) मृणालवति, साम्प्रतमेव सम्पूर्णतां गतं मे पृथिवीवल्लभत्वम् ।

**मृणालवती**—( अपसर्तुं मोचं प्रयतमाना ) किम् एतत् क्रियते अत्रभवता ?

**मुञ्जः**—( सस्मितम् ) मृणालवति, आनन्दमनुभवामि अनुभावयामि च ।

**मृणालवती**—किमिति माम् अत्रभवान् कलङ्कितां करोति भनक्ति च मे तपश्चरणम् ?

**मुञ्जः**—कथं पुनरपि दम्भावलम्बः ? मृणालवति, आनन्दमयः खलु परमेश्वरः । अतः आनन्दसमाधिम् अनुभवन् न कदापि कलङ्कितो भवति । कलङ्को हि पापिन एव सम्भवति निर्बलस्यैव च तपोभङ्गः । यत्सत्यम् आनन्दे अरुचिरेव रोगः, यस्मात् साम्प्रतं मुक्ताऽसि ।

**मृणालवती**—( आत्मानं मोचयित्वा ) मुञ्जराज, अद्भुतः खलु भवान् ।



**मुञ्जः**—भवतु । मृणालवति, सत्यमेव ते कथयामि यदेषा स्थितिर्नैव ते सुखाय सम्पत्स्यते । ( पृष्ठम् ४५ )



**मुञ्जः**—न खलु अद्भुतः किन्तु अनुभवसम्पन्नोऽहम् । त्वया च अनुभवं कारयितुमेव विधिना अत्र प्रेषितोऽस्मि । अन्यथा, किमर्थोऽयं मे कारा-निवासः ? ( पुनरपि मृणालवतीम् आलिङ्गति । )

**मृणालवती**—भोः पृथिवीवल्लभ, मुञ्च माम् । साम्प्रतं गन्तुमर्हामि ।

**मुञ्जः**—किमर्थम् ?

**मृणालवती**—अथ एतद् ज्ञायते दासीभिः तैलपेन वा ?

**मुञ्जः**—कामं सर्वेऽपि जानन्तु । किं कश्चिद् अपराधः कृत आवाभ्याम् ?

**मृणालवती**—( सकौतुकम् ) असीमा खलु भवतो निर्भयतायाः ।

**मुञ्जः**—कथमिव ?

**मृणालवती**—नैव किमपि गण्यते भवता ।

**मुञ्जः**—किमिति गण्येत ? सेवकस्य क्षुद्रस्य वा स्याद् भयम् । किमिति पुनरावयोः ? अपि जांतु सिंहमिथुनं लज्जितम् अवलोकितम् ?

**मृणालवती**—स्थाने खलु उच्यते पृथिवीवल्लभो भवान् ।

**मुञ्जः**—भवतु । मृणालवति, कियन्तं कालमत्र मया एवं स्थातव्यम् ?

**मृणालवती**—( मुञ्जहस्ताद् अपसृत्य ) धैर्यम् अवलम्ब्यताम् । लभ्येत कश्चिदुपायो गच्छता कालेन ।

**मुञ्जः**—मा मा एवम् । गच्छता कालेन कदाचित् कवलितौ स्याव । नहि आवां बालौ युवानौ वा यद् अवसरं प्रतीक्षितुं पारयेव । पश्य, शनैः शनैः शुभ्रतां यान्ति ते शिरोरुहाः । अहमपि सम्प्रति पञ्चाशद्वर्षदेशीयः ।

**मृणालवती**—( सविस्मयम् ) किमाह भवान् ? पञ्चाशद्वर्षदेशीयः ? मन्मते तु—

**मुञ्जः**—( सहास्यम् ) क्रीडासक्तः बालः तरुणीरक्तः नवतरुणो वा नु ?

**मृणालवती**—सत्यमेव । यतो नैकोऽपि धवलो बालः, मसृणमणिकुट्टिमवत् वलिरहितश्च ललाटदेशः ।

**मुञ्जः**—वयः खलु मनस्येव समायत्तम् । भवतु । मृणालवति, सत्यमेव ते कथयामि यद् एषा स्थितिः नैव ते सुखाय सम्पत्स्यते ।

**मृणालवती**—किमिति ?

**मुञ्जः**—अहं हि शत्रुरेव अस्य देशस्य। तव भ्राता च रिपुरस्ति मे। अपि च त्वमत्र सर्वैः तपस्विनी मन्यसे। किं बहुना, राजमातृसदृशं पदमेव धार्यते त्वया। तस्माद् यदि कदाचिद् रहस्यमेतद् भिद्येत, तदा दारुणां दुर्दशाम् आपत्स्यसे।

**मृणालवती**—(किञ्चिद् विचार्य) तत् कस्तत्र उपायः?

**मुञ्जः**—बहवः खलु तत्र उपायाः। अयं च प्रथमः। विस्मर्यताम् अयं पापमलीमसो मुञ्जः प्रारभ्यतां च पुनः साडम्बरं तपश्चरणम्। (मृणालवत्याः मुखं दुःखितमवलोक्य) इदं चेत् न शक्यम्, तर्हि तैलपस्य सिंहासनम् आरुह्यताम्।

**मृणालवती**—किम् आरोहणेन? ननु इदानीमपि ममैव अस्ति तत्र अधिकारः!

**मुञ्जः**—भ्रान्तिपूर्णोऽयं विचारः। सिंहासनपार्श्वावस्थानं तदारोहणं च इत्येतयोः सुमहत् खलु अन्तरम्।

**मृणालवती**—कथं तु सिंहासनम् आरोढुं शक्यम्?

**मुञ्जः**—तैलपः कारागृहे निक्षिप्यताम्।

**मृणालवती**—शान्तं पापम्। न कदापि शक्यमेतत्। पुत्रवत् संवर्धितस्य बन्धोः कारानिक्षेपणं नैव विचारणीयम् अपि।

**मुञ्जः**—तदेवं क्रियताम्।

**मृणालवती**—किं नाम?

**मुञ्जः**—आगम्यतां मया सार्धम् अवन्तिपुरम्।

**मृणालवती**—(साश्चर्यभरम्) अवन्तिपुरम्?

**मुञ्जः**—विभूष्यतां च तत्र मे महिषीपदम्।

**मृणालवती**—न खलु जानामि भवद्वचनार्थम्।

**मुञ्जः**—मृणालवति, भगवतो महाकालेश्वरस्य छायायां पृथिव्याः बलिष्ठं सिंहासनं तिष्ठति। इतःपरम् आवाम् उभावपि तद् अलङ्करिष्यावः।

**मृणालवती**—परन्तु—



**मुञ्जः**—अथ न इदमपि शक्यम्, तदा इदानीन्तनी स्थितिरेव तिष्ठतु। न च मे तस्या भयम्। परं सा नैव ते सुखाय भवेत्। नहि ते तपस्विनीपदमपि अक्षतं तिष्ठेत्, न वा आनन्दानुभवोऽपि अखण्डितः स्यात्।

**मृणालवती**—पृथिवीवल्लभ, सर्वथा मोहिताऽस्मि भवता। न जाने किम् अनुष्ठेयम् इति। न खलु सहोदरं कारागारे निक्षेप्तुमर्हामि। अतः आगमिष्यामि भवता समम्।

**मुञ्जः**—तद् इदानीमेव एहि मया सार्धम्।

**मृणालवती**—इदानीमेव! कथं तु गम्येत?

**मुञ्जः**—गम्येत यथाकथञ्चित्। नहि कामदेवं निरोद्धुमलं कारागारम्।

> **न पाषाणभित्तिर्न वा लोहदण्डा**
> **निरोद्धुं समर्था अनङ्गं कदाचित्।**
> **महादेवदग्धोऽपि नित्यं विधत्ते**
> **रसार्द्राणि यः प्राणिनां जीवितानि ॥ ६ ॥**

**मृणालवती**—मुञ्जराज, तत्र पुनर्भवतो महिषी स्यादेव।

**मुञ्जः**—(उच्चैः हसित्वा) अयि मुग्धे, सा एव महिषी या मे हृदये निवसति।

**मृणालवती**—नाथ, नास्ति अस्या दास्याः शक्तिः भवन्तं प्रत्याख्यातुम्। तथापि कथमेकपदे विना प्रबन्धमेव आगच्छेयम्।

**मुञ्जः**—तत् कदा आगमिष्यसि?

**मृणालवती**—श्वः अस्मिन्नेव समये।

**मुञ्जः**—भवतु। श्व आगम्यताम्। अहं प्रतिपालयिष्यामि। [मृणालवती निष्क्रान्ता। सुरङ्गामुखम् उपेत्य] अयि भोज,

[भोजः धनञ्जयः पद्मगुप्तश्च प्रविशन्ति।]

**भोजः**—तात, त्वर्यताम् अधुना।

**मुञ्जः**—वत्स, अलं त्वरातिशयेन। अद्य तावत् न शक्नोमि आयातुम्।

**भोजः**—किं नाम?

**मुञ्जः**—वल्लभासहितम् आगमिष्यामि।

**धनञ्जयः**—( साश्चर्यम् ) वल्लभा ?

**मुञ्जः**—किं नु खलु अत्र विस्मयकारणम् ? नहि कारागारस्य अन्धकारः कामदेवस्य परिपन्थीभवति । अपि विस्मृतं कविराजेन यत्—

> **नैव लोकत्रये किञ्चित् स्थानं समुपलभ्यते ।**
> **प्रभवन्ति न यत् प्राप्तुं पञ्चबाणस्य पत्रिणः ॥ ७ ॥**

**भोजः**—तात, का पुनर्वल्लभा अत्र समासादिता ?

**मुञ्जः**—मृणालवती ।

**धनञ्जयः**—( साश्चर्यम् ) किमाह देवः ?

**मुञ्जः**—सत्यमेव उक्तं मया । सा खलु तपस्विनी अतिमात्रं तप्यते विरहाग्निना ।

**भोजः**—तात, न खलु यापनीयः एकोऽपि दिवसः । किं नाम न भवेद् एकस्मिन् दिवसे ?

**मुञ्जः**—किं भवेत् ? सूर्यस्य उदयः अस्तमनं च ।

**भोजः**—तात, यदि न अस्मासु तथापि अवन्तिदेशे तावद् अनुग्रहः कार्यः इति साञ्जलिबन्धम् अभ्यर्थये । सम्प्रति कालक्षेपः सर्वनाशायैव कल्प्यते ।

**मुञ्जः**—वत्स, नूनम् अपरिपक्वोऽसि । वरं प्राणत्यागः न तु प्रियावचनभङ्गः ।

**भोजः**—तत् किं श्वः अस्मिन्नेव समये आगच्छेम ?

**मुञ्जः**—बाढम् । सम्यक् क्रियतां सकलः प्रबन्धः ।

**भोजः**—यथाऽऽज्ञापयति तातः । [ भोजः कविभ्यां सह निष्क्रान्तः । ]

इति प्रथमः प्रवेशः ।

---

## द्वितीयः प्रवेशः ।

**स्थलम्**—भिल्लमस्य उद्यानम् ।

**समयः**—षष्ठः दिवसः । प्रातःकालः ।

[ रसनिधिः इतस्ततो विचरति । ]

**विलासवती**—( प्रविश्य ) कविराज, किं क्रियतेऽधुना ?

**रसनिधिः**—न किञ्चित् सविशेषम् ।



**विलासवती**—तत् कथ्यतां मे काचित् सरसा कथा । अतीव रोचते मे भवतः कथाकथनम् ।

**रसनिधिः**—विलासवति, काश्चन काव्यकथाः श्राविता एव मया । अधुना तु समाप्तप्रायो गण्यताम् अयमारम्भः ।

**विलासवती**—किमिति ?

**रसनिधिः**—मान्यखेटपुराद् अपगन्तुं कृतनिश्चयोऽस्मि ।

**विलासवती**—क्व जिगमिष्यते ?

**रसनिधिः**—अवन्तिपुरम् ।

**विलासवती**—कदा ?

**रसनिधिः**—यदि आर्यभिल्लमः अनुमन्येत, तदा इदानीमपि ।

**विलासवती**—कदा च निवर्तिष्यते ?

**रसनिधिः**—यदा हि भगवान् शम्भुरानेष्यति ।

**विलासवती**—शिव शिव ।

**रसनिधिः**—अहमपि एवमेव शिवस्मरणं चिकीर्षामि । बलवद् अनुतप्तं हि मे मनः ।

**विलासवती**—अनुतप्तम् ? कस्मात् ?

**रसनिधिः**—व्यर्थं खलु मया निष्पापहृदया त्वं रसविश्वे प्रवेशिता ।

**विलासवती**—कविराज, किमिति एवं खिद्यते ?

**रसनिधिः**—तव हेतोः ।

**विलासवती**—( सविस्मयम् ) किं मम हेतोः ?

**रसनिधिः**—अथ किम् । विलासवति, जानासि एव कविवचनं साहित्यसङ्गीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः इति । एतादृशपशुबहुले अस्मिन् देशे का स्यात् तव दशा इत्येव चिन्ताकुलोऽस्मि । (ईषत् संस्तभ्य) विलासवति, अथ शक्यम्—

**विलासवती**—तत् किम् ?

**रसनिधिः**—त्वामपि अवन्तिपुरं निनीषामि ।

[ विलासवती दृष्टिं भूमौ स्थिरीकरोति। रसनिधिश्च तां सस्नेहम् अवलोकमानः तिष्ठति । ]

**अकलङ्कचरितः**—( प्रविश्य सरोषम् ) विलासवति, कोऽयम् ?

**विलासवती**—अयं खलु कविरेव मुञ्जराजस्य ।

**अकलङ्कचरितः**—अपि अयं तेषाम् एकतमः ये महासामन्तेन विमोचिताः ?

**विलासवती**—अथ किम् ।

**अकलङ्कचरितः**—( रसनिधिं प्रति सपरुषस्वरम् ) अत्र किं करोषि ?

**रसनिधिः**—दृश्यते एव भवता किं करोमि इति ।

**अकलङ्कचरितः**—रे जाल्म, किं न अपत्रपसे अनयाऽत्र रहसि सम्भाषमाणः ?

**रसनिधिः**—न मनागपि। प्राणरक्षकस्य सुतया सम्भाषणे नैव कमपि दोषं पश्यामि ।

**अकलङ्कचरितः**—( सक्रोधम् ) रे दास्याःपुत्र, इदं खलु मान्यजनोषितं मान्यखेटपुरं वर्तते, न स्वैराचारभूमिः अवन्तिपुरी ।

**रसनिधिः**—सम्यग् जानामि ।

**अकलङ्कचरितः**—( सक्रोधभरम् ) विलासवति, कथमनेन धृष्टेन संस्कारशून्येन नरपशुना सम्भाषणं क्रियते ?

**विलासवती**—कुमार, अलं क्षोभेण । सज्जनः खलु एषः ।


**अकलङ्कचरितः**—हा धिक् ते वैराग्यं तपश्चरणं च। न च सदृशमेतद् भाविन्याः तैलङ्गणसम्राज्ञ्याः । ( रसनिधिं प्रति ) रे नरापसद, यदि पुनरहं त्वाम् अनया सम्भाषमाणं पश्यामि तदा तत्क्षणमेव वियोक्ष्यसे प्राणैः।

**विलासवती**—कृतं कोपातिशयेन । कुमार, किन्निमित्तम् आगमनम् ?

**अकलङ्कचरितः**—त्वामेव द्रष्टुमागतः। न पुनरिदानीं क्षणमपि स्थातुमिच्छामि । [ निष्क्रान्तः । ]

**विलासवती**—कुमार, कुमार—

**रसनिधिः**—विलासवति, अपि ज्ञातमधुना किमिति तव हेतोः खेदमन्वभवम् इति ?



**अकलङ्कचरितः**—रे नरापसद, यदि पुनरहं त्वामनया सम्भाषमाणं पश्यामि तदा तत्क्षणमेव वियोक्ष्यसे प्राणैः।

( पृष्ठम् ५० )

**विलासवती**—कविराज, क्षन्तुमर्हति मां भवान् । अहमेव हेतुरस्य वाक्ताडनस्य ।

**रसनिधिः**—मा मा एवम् । यथा मया तव हेतोः तथा त्वयाऽपि मम हेतोः सोढ एव उपालम्भः ।

**विलासवती**—कविराज, श्रूयतां पुनरेका मे अभ्यर्थना ।

**रसनिधिः**—का नाम ?

**विलासवती**—मा कदाचित् कुमाराय प्रतिवचनं दीयताम् । स हि अत्यन्तकोपनः क्रूरकर्मा च न जाने कोपवशात् किं करिष्यति इति ।

**रसनिधिः**—अत एव गन्तुमिच्छामि स्वदेशम् ।

**विलासवती**—अवश्यं गम्यताम् । यदि शक्यम्—

**रसनिधिः**—तर्हि किम् ?

**विलासवती**—अहमपि भवता साकम् आगमिष्यामि । पश्य, अम्बा इत एव आयान्ती दृश्यते । अतो गच्छामि । [ निष्क्रान्ता । रसनिधिः इतस्ततः परिभ्रमति । ]

**लक्ष्मीः**—( प्रविश्य साश्चर्यम् ) रसनिधे, कथम् अद्यापि अत्रैव स्थीयते ?

**रसनिधिः**—( इतस्ततो निर्वर्ण्य ) अद्य रात्रौ गन्तव्यम् ।

**लक्ष्मीः**—( सतिरस्कारम् ) किम् अतीतायां रात्रौ शुभमुहूर्तो नासीत् ?

**रसनिधिः**—तेन तु प्रत्याख्यातम् ।

**लक्ष्मीः**—केन ? पृथिवी—

**रसनिधिः**—बाढम् ।

**लक्ष्मीः**—किन्निमित्तम् ?

**रसनिधिः**—कारागृहनिरुद्धोऽपि विद्धः किल असौ कामबाणैः ।

**लक्ष्मीः**—( साश्चर्यम् ) एवम् ? का नाम तत्रापि उपलब्धा तेन ?

**रसनिधिः**—मातः, अतिगोपनीयम् एतद् रहस्यम् । ( कर्णे कथयति । )

**लक्ष्मीः**—( साश्चर्यभरम् ) अपि सत्यमुच्यते ?

रसनिधिः—अथ किम्।

लक्ष्मीः—( सुचिरम् उच्चैः विहस्य अन्ते च पटान्तेन अश्रूणि प्रमृज्य ) अविश्वसनीयम् एव प्रतिभाति।

रसनिधिः—मातः, सत्यमेव उक्तं मया। अद्य रात्रौ किल साऽपि अस्माभिः साकम् आगमिष्यति।

लक्ष्मीः—भवतु। रसनिधे, मन्ये त्वमपि विलासवतीम् अपहर्तुं कृतमतिः स्याः।

रसनिधिः—( सविस्मयं परावृत्य ) अपि भवत्या विदितम् एतत् ?

लक्ष्मीः—त्वया न कथितम् इति किम् अविदितमेव स्याद् अन्येषाम् ?

रसनिधिः—अपि तद् भवत्या अनुमन्यते ?

लक्ष्मीः—कथं नानुमन्येत ? ननु तपोवननिवासात् नन्दनवनवास एव श्रेयान् ?

रसनिधिः—किन्तु मातः, किं तैलङ्गणसम्राज्ञीपदात् सामान्यकवेः पत्नीपदं श्रेयः ?

लक्ष्मीः—अरे शठ, कृतं कपटाभिनयेन। सर्वमपि ज्ञायते मया। किं नाम तैलङ्गणसम्राज्ञीपदात् मालवसम्राज्ञीपदम् अवरमस्ति ?

रसनिधिः—मातः, एतत् तावत् प्रतिश्रृणोमि यत् सा नित्यमेव मे हृदयसम्राज्ञीपदारूढा स्थास्यति।

लक्ष्मीः—किम् अतःपरम् अपि प्रियं मे स्यात् ?

रसनिधिः—भवतु, गच्छामि अधुना। ( प्रणमति। )

लक्ष्मीः—आयुष्मन्, विजयभाग् भूयाः। अहमपि आयामि एव।
[ उभौ निष्क्रान्तौ। ]

इति द्वितीयः प्रवेशः।

---



## तृतीय प्रवेशः।

**स्थलम्**—मृणालवत्याः मन्दिरम्।

**समयः**—षष्ठः दिवसः। मध्याह्नकालः।

[ मृणालवती इतस्ततः परिभ्रमति। ]

**मृणालवती**—( आत्मगतम् ) न खलु ज्ञायते किमधुना विधेयम् इति। मुञ्जेन सार्धम् अवन्तिपुरं गन्तव्यं वा न वा ? अद्य तावन्मोहवशात् प्रतिश्रुतं मया सहागमनम्। तत् तु नैव समुचितं कृतम् इति साम्प्रतं भाति। अत्र हि सिंहासनम् अनारूढाऽपि सर्वाधिकारसम्पन्नाऽस्मि। तत्र तु इदानीन्तनी मानगौरवप्रभुत्वान्विता स्थितिः नैव स्थास्यति। अपि च, अत्र संन्यस्तसकलसुखा तपस्विनी इति सर्वासां प्रजानां सभयादरभाजनं भूताऽस्मि। तत्र पुनर् मुञ्जवशीभूतां प्राकृतस्त्रियम् एव मंस्यते मां जनः। तैलङ्गणेषु च सुमहती भवेन्मे अपकीर्तिः। क्व नाम राज्यविधात्रीपदं क्व च दासीभावः ? क्व वा तपस्विनीपदं क्व च अभिसारिकाभावः ? एवं नैव युक्तम् आचरितं मया तस्मै सहागमनं प्रतिश्रुतवत्या।

( विचार्य ) कथं पुनर्न गन्तव्यमपि ? किं तेन विहीना जीवितुं प्रभविष्यामि ? मन्ये यत्सत्यं विधात्रा मुञ्जार्थमेव निर्मिता तदर्थमेव च वैधव्यम् आपादिताऽहम्। हन्त तत्सङ्गेनैव नन्दनवनत्वं प्रापिता मे जीवितमरुस्थली। सुदीर्घदुःखतापपूर्वकश्च अयं सुखधारासम्पातः। अतः तेन वियोगः सकलसुखवियोगे एव परिणंस्यति। साम्प्रतं तेन सह स्वर्गसुखम् अनुभवन्ती अहं तेन वियुक्ता दुःखदारुणे रौरवनरके एव पतिष्यामि। ( ईषत् स्तब्ध्वा ) कथं नाम तदपि सह्यं स्यात् ? गते पृथिवीवल्लभे किं खलु मानेन गौरवेण पृथिव्याः प्रभुत्वेन वा ? मुञ्जविहीनं जीवनं नहि जीवनसंज्ञामपि अर्हति। तद्धि मरणादपि दारुणतरं भवेत्। अतो मुञ्जस्य अर्थे मानगौरवप्रभुत्वादीनां परित्याग एव श्रेयान् भाति। वरं पृथिवीवल्लभस्य दासीभावः, न तु तेन विहीनं प्रभुत्वम्। भोः पृथिवीवल्लभ, अवश्यम् आयास्यामि त्वया समम्। तव दासीभावोऽपि मे अभिमततरः तैलङ्गणप्रभुत्वात्।

( पुनर् विचार्य सचिन्तम् ) किन्तु-किन्तु-मुञ्जः खलु युवा सुन्दरः रसिकः सौन्दर्यलोलुपः रमणीजनवशीकरणे निपुणश्च वर्तते। तेन हि नैकनारीहृदयानि

सन्तोषितानि क्लेशितानि च स्युः। अहं तु अपगतयौवना अस्तमितलावण्या अरसिका कलाविद्वेषिणी चास्मि। नास्ति मयि सौन्दर्यजनितम् आकर्षणम्, न च रसास्वादे सहकारशक्तिः, न वा बाल्यसुलभः श्रद्धावान् प्रणयः। एवं सति कथं नाम स्याद् आवयोः सुसंवादः? यत्सत्यम् अतिकोमलरज्ज्वा एव संयोजितौ स्वः, या खलु स्वल्पाघातेन अपि भङ्गम् आपत्स्यते।

कामम् इदानीन्तनं मुञ्जस्य वर्तनं स्नेहमधुरम् आभाति। स्नेहस्तु असौ क्षणिक एव स्यात्। क्षणिकसुखार्थम् एव तेन वशीकृता स्याम्। एवम् अनेका नार्यः तेन वशीकृताः स्युः। तस्माद् अवन्तिपुर्याम् अनेकरसिकसुन्दरीभिः परिवृतः सन् कथं नाम मयि अनुरक्तः स्यात्?

एवम् अवन्तिपुरं गताया मे न केवलम् अत्रत्ययोः प्रभुत्वयशसोरेव हानिः स्यात् किन्तु मुञ्जसङ्गोऽपि परिहीयेत। कोऽर्थः तर्हि तेन सह गमनेन? हा नैव कश्चित् निश्चयो भवति।

( विचार्य ) भवतु। तद् एवम् एव कार्यम्। मुञ्जः तावद् अत्रैव तिष्ठतु। तेन हि सर्वमपि साधितं स्यात्। मम प्रभुत्वमपि अक्षतं तिष्ठेत्, मुञ्जसङ्गश्च अखण्डितं लभ्येत। अयमेव नूनं साधिष्ठो भाति उपायः। तदर्थं च विफलीकर्तव्यः मुञ्जस्य मुक्तिप्रयत्नः। स तु तथा विफलीकर्तव्यः यथा तैलपो न किमपि जानीयात्। नो चेत्, क्रोधवशात् तं सत्वरं हन्तुम् उद्यतो भवेत्।

( प्रकाशम् ) कः कोऽत्र भोः? [ त्यागानन्दः प्रविशति। ] त्यागानन्द, क्व वर्तते कुमारः?

**त्यागानन्दः**—आर्ये, नातिदूरे एव तिष्ठति।

**मृणालवती**—तद् आह्वय तं सत्वरम्। [ त्यागानन्दः निष्क्रान्तः। अचिरादेव अकलङ्कचरितः प्रविशति। ] एहि। कुमार—

**अकलङ्कचरितः**—किं मातः?

**मृणालवती**—वत्स, अस्ति ते शौर्यसदृशं महदेकं कार्यम्।

**अकलङ्कचरितः**—किमिव?

**मृणालवती**—महान् एकः कपटप्रबन्धो मे श्रुतिपथम् आगतोऽस्ति।

**अकलङ्कचरितः**—किंसम्बद्धः?



**मृणालवती**—मुञ्जसम्बद्धः।

**अकलङ्कचरितः**—( सविस्मयातिशयम् ) आश्चर्यम्। कीदृशो नाम?

**मृणालवती**—शृणु। अद्य रात्रौ मुञ्जस्य मुक्तये प्रयत्नो भविष्यति।

**अकलङ्कचरितः**—कथं त्वया ज्ञातं मातः?

**मृणालवती**—वत्स, तव पितुः राज्यस्य रक्षणे अहर्निशं निरताऽहं कथं न जानामि? तत् शृणु। अद्य रात्रौ निशीथसमये मुञ्जं मोचयितुं जनाः आगमिष्यन्ति।

**अकलङ्कचरितः**—कुतः?

**मृणालवती**—सुरङ्गापथेन।

**अकलङ्कचरितः**—एवम्?

**मृणालवती**—अथ किम्। तद् गत्वा विफलीक्रियतां स कपटप्रबन्धः।

**अकलङ्कचरितः**—यथाऽऽज्ञापयति माता।

**मृणालवती**—वत्स, अपि जानासि किमिति त्वमेव अत्र नियुक्त इति?

**अकलङ्कचरितः**—नैव।

**मृणालवती**—पश्य, तव जनकस्य बुद्धिः द्वेषदूषिताऽस्ति। स च अत्यन्तमुत्सुकोऽस्ति मुञ्जहननाय। राजनीत्यनुसारेण तु सदैव अस्पर्श्यमेव राजशरीरम्। त्वम् एतां नीतिम् अनुरुध्येथाः इत्येव अत्र नियुक्तोऽसि। पश्य, तथा वर्तेथाः यथा मुञ्जः सर्वथा अक्षतशरीर एव स्यात्। नो चेत्, अकलङ्का ते कीर्तिः कलङ्किता भवेत्।

**अकलङ्कचरितः**—अलं चिन्तया। सर्वमपि सम्यक् निर्वर्तयिष्यामि।

[ निष्क्रान्तः। ]

इति चतुर्थः अङ्कः।

# पञ्चमः अङ्कः ।

## प्रथमः प्रवेशः ।

**स्थलम्**—भिल्लमस्य उद्यानम् ।

**समयः**—षष्ठः दिवसः । निशीथकालः ।

[ लक्ष्मीदेवी विलासवती च दृश्येते । विलासवती मन्दं मन्दं विलपति, लक्ष्मीदेवी च तां सान्त्वयति । ]

**लक्ष्मीः**—जाते, अलं शोकेन । अचिरादेव मोक्ष्यसे अस्मात् कारागृहात् ।

**विलासवती**—मातः, सत्यमुक्तं त्वया । अस्मात् कारागारात् मुक्ता भूत्वा सत्यमेव नन्दनवनस्वामिनी भविष्यामि । कथं तु सह्यः त्वया वियोगः ?

**लक्ष्मीः**—वत्से, अपरिहार्य एव मातृवियोगो वनिताजनस्य ।

**रसनिधिः**—( सरभसं प्रविश्य ) मातः, त्वर्यतां त्वर्यताम् । अनुधावन्ति हि मां राजसैनिकाः । विफलीभूतः कूटप्रबन्धः । ( प्रणमति । )

**लक्ष्मीः**—भवतु गम्यताम् । विजयी भूयाः । [ विलासवती मातरम् आलिङ्गति दुःखितवदना च रसनिधिना सह निष्क्रामति । लक्ष्मीः सचिन्तम् इतस्ततः परिभ्रमति । ]

**अकलङ्कचरितः**—( ससम्भ्रमं प्रविश्य ) देवि, अपि दृष्ट इदानीं कश्चिद् इतः पलायमानः ?

**लक्ष्मीः**—कथं कुमारः ? कथम् इदानीम् इहागतः ?

**अकलङ्कचरितः**—मातः, अपि कश्चिद् इतः पलायमानो दृष्टः ? साम्प्रतम् एव विद्रुतास्ते पापिनः ।

**लक्ष्मीः**—साम्प्रतं तावत् न कोऽपि दृष्टः । [ अकलङ्कचरितः निष्क्रान्तः । नेपथ्यात् "कुमार, कुमार, दृश्यताम् एष कश्चित् शिवालयं प्रति धावितः ।" इति शब्दाः श्रूयन्ते, बहूनां धावतां पदरवश्च । सभयम् ] हा धिक् । हा धिक् । कथम् अयं दुरात्मा सैनिकैः सहितो रसनिधिम् अनुधावति । किम् अधुना करोमि ? किम् आर्यपुत्रं बोधयामि ? न पुनर् अस्मिन् विषये अद्ययावत् किमपि ज्ञापितः आर्यपुत्रः । हा सम्मूढं मे मनः । ( अञ्जलिं बद्ध्वा ) भगवन् पिनाकपाणे, सम्प्रति त्वमेव मे शरणम् । [ नेपथ्ये पुनः कोलाहलो जायते । साक्रोशम् ] हा हताऽस्मि । भिल्लमराज, भिल्लमराज—



**भिल्लमः**—( प्रविश्य ) लक्ष्मि, किम् एवम् आक्रुश्यते ?

**लक्ष्मीः**—नाथ, महान् अनर्थः सञ्जातः ।

**भिल्लमः**—किं वृत्तम् ?

**लक्ष्मीः**—प्रथमं तावत् क्षन्तव्याऽहं यदत्र विषये सर्वं जानत्या अपि न मया किमपि कथितम् आर्यपुत्राय ।

**भिल्लमः**—भवतु ।

**लक्ष्मीः**—अस्मदीयभवने यो रसनिधिर्नाम कविः अवसत् स नूनं मुञ्जराजस्य भ्रातृपुत्र एव ।

**भिल्लमः**—एवम् ? ततस्ततः ?

**लक्ष्मीः**—तेन च मुञ्जराजस्य मुक्त्यर्थं महान् कूटप्रबन्धो रचितः । तत्र तु दुर्भाग्यात् हतोद्यमोऽसौ अधुनैव विलासवतीम् आदाय पलायितः ।

**भिल्लमः**—( सक्रोधम् ) आः कृतघ्न—

**लक्ष्मीः**—नाथ, अलं क्षोभेण । सा हि स्वेच्छया एव गताऽस्ति तेन समम् । तौ हि परस्परम् अनुरक्तौ स्तः ।

**भिल्लमः**—तत् किम् आक्रोशकारणम् ? साधुरेव अयं घटनाक्रमः ।

**लक्ष्मीः**—किन्तु नाथ, अधुना एव कुमारः सैनिकैः साकं तम् अनुधावितोऽस्ति ।

**भिल्लमः**—( साश्चर्यम् ) एवम् ?

**लक्ष्मीः**—अथ किम् । अत एव मे चिन्ता ।

**भिल्लमः**—( विचार्य ) तत् किमत्र विधेयम् ?

**लक्ष्मीः**—( सरोषम् ) किं विधेयम् ? किम् अत्रभवान् स्वयं गत्वा तौ त्रातुं न समर्थः ?

**भिल्लमः**—प्रिये, युक्त एव ते रोषः । कथं पुनर् मान्यखेटनगरे स्थित्वा कुमारेण विग्रहः कार्यः ? सामन्तः खलु अहम् ।

**लक्ष्मीः**—( सकोपम् ) स्यूनराज, धिग् भवतो बाहुबलं यत् स्वसुताया अपि रक्षणे असमर्थमस्ति ।

[ ततः प्रविशतः तैलपः मृणालवती च । ]

**तैलपः**—महासामन्त, महतः खलु अनर्थात् त्रातोऽस्मि महादेवेन ।

**भिल्लमः**—कीदृशः अनर्थः ?

**तैलपः**—मुञ्जेन किल मुक्तये महान् कूटप्रबन्धो रचितः । कुमारस्य दक्षत्वात् तु न सिद्धिं गतः ।

**भिल्लमः**—एवम् ? क्व च वर्तते कुमारः ?

**तैलपः**—मुञ्जस्य सहायान् ग्रहीतुं तान् अनुधावितोऽस्ति । अचिरादेव विजयश्रिया सार्धम् आगच्छेत् ।

**मृणालवती**—क्व वर्तते विलासवती ?

**लक्ष्मीः**—सुप्ता एव स्यात् । गत्वा अवबोधयामि । [ निष्क्रान्ता । मृणालवती अपि ताम् अनुगच्छति । ]

**तैलपः**—भिल्लमराज, वयमपि शिवमन्दिरं गच्छावः । यतो मुञ्जस्य सहायाः सुरङ्गापथेन पलायिताः इति श्रूयते । अतः कुमारोऽपि तेनैव गतः स्यात् ।

**भिल्लमः**—यथाऽऽज्ञापयति देवः ।

[ उभौ गन्तुम् उच्चलतः । ततः प्रविशति एकस्मिन् हस्ते रुधिरलाञ्छितं मस्तकं द्वितीये च खड्गखण्डं धारयन् अकलङ्कचरितः । ]

**अकलङ्कचरितः**—जयतु जयतु तातः ।

**तैलपः**—( साश्चर्यभरम् ) कुमार, किमेतत् ?

**अकलङ्कचरितः**—एतत् खलु तस्याः कुलटायाः शीर्षं या मां विहाय तेन नरपशुना सह पलायिता ।

**भिल्लमः**—( भयचकितम् ) किं विलासवत्याः मस्तकम् ?

**अकलङ्कचरितः**—( सस्मितम् ) बाढम् । भाविन्याः तैलङ्गणसम्राज्याः मस्तकमिदम् ।

**तैलपः**—केन पुनश्छिन्नम् एतत् ?



**अकलङ्कचरितः**—तात, श्रूयताम् । मुञ्जमोचने हतोद्यमः स भोजः विलासवतीम् आदाय विद्रुतः । अहं च तम् अनुधावितः । सुरङ्गापथे आवयोः भीषणं बाहुयुद्धम् अभूत् । प्रथमतः अहम् असकृत् तं प्रतिसारितवान् । अन्ते तु अतीव श्रान्तो गृहीतश्च तेन । किन्तु रणे एव त्वां निहनिष्यामि न अत्र इति उक्त्वा तेन विसृष्टः । अथ निवर्तमानः गाढतिमिराकुले पथि पतितायाः गतसंज्ञायाश्च विलासवत्याः शीर्षम् अनेन खड्गखण्डेन छित्वा सत्वरम् आयातः ।

[ ततः प्रविशतः मृणालवती लक्ष्मीदेवी च । ]

**मृणालवती**—कस्याः शीर्षम् ?

**अकलङ्कचरितः**—विलासवत्याः ।

**लक्ष्मीः**—( उच्चैः आक्रुश्य ) हा विलासवत्याः मस्तकम् । ( अकलङ्कचरितं सरभसम् उपेत्य ) कुमार, किं त्वया एव हता मे दारिका ?

**तैलपः**—आस्तां तावद् एतत् सर्वम् । देवि, संह्रियतां कोपः ।

**लक्ष्मीः**—( साक्रोशम् ) भिल्लमराज, प्रेक्ष्यतामेष कुमारस्य विक्रमः, क्रियतां च तस्य चरणरजसा ललाटे तिलकः, येन भवदीया एकाकिनी दुहिता लोकान्तरं प्रेषिता । हा धिग् भवतो भीरुत्वम् । किं छिन्नहस्तो भवान् ? अपि विक्रीतानि आयुधानि ? येन नरपिशाचेन भवदीयदुहितुः शिरश्छिन्नं तस्य शिरश्छेदे किं नालम् अत्रभवान् ? किम् ईक्ष्यते ? ईक्ष्यते किम् ?

[ भिल्लमः सक्रोधनेत्रः वलिभलललाटश्च लक्ष्मीमुखं प्रेक्षमाणः आस्ते । ]

**मृणालवती**—( सरोषम् ) लक्ष्मि, किं जल्पसि ? शान्तिं भज ।

**लक्ष्मीः**—शान्तिं भजामि ? कथं शान्तिं भजामि ? किं खलु अपराद्धं मे सुतया ? ननु भवती अपि मुञ्जेन सह मालवदेशं गन्तुम् उद्यताऽऽसीत् ? तथापि भवत्याः शिरः न वियोजितं कबन्धात्, यतो भवती तैलपराजभगिनी । अस्याः शिरस्तु कबन्धाद् वियोजितम्, यतः इयम् अस्य दरिद्रस्य कातरस्य च स्यूनराजस्य पुत्री ।

[ सर्वे सविस्मयम् अन्योन्यमुखम् ईक्षन्ते । मृणालवती भयशोकचिन्तात्रपाभिः अभिभूता तिष्ठति । ]

**तैलपः**—भिल्लमराज, लक्ष्मीः प्रमत्ता इव लक्ष्यते। अतः सत्वरम् इतः अपनीयताम्।

**लक्ष्मीः**—नाथ, सत्वरम् अपनीयताम् अयं जनः। किन्तु कुत्र?

**शीघ्रं भवाञ्जनमिमं नयतु स्वदेशम्**
**अस्या भुवोऽन्नमुदकं च विषोपमानम्।**
**क्रूरेण येन निहता प्रियदारिका मे**
**तस्य प्रतिप्रहरणाय समुत्सुकाऽहम्॥ १॥**

कथं तु भवान् तथा कुर्यात्? भवान् खलु महासामन्तः, नहि नहि, दास एव तैलपस्य। भवता हस्तयोः कङ्कणानि एव धार्यन्ते। नपुंसकभावश्च अङ्गीकृतोऽस्ति। कथम् एवंविधो भवान् मां स्यूनदेशं नयेत्? अहं पुनर्गमिष्यामि। अहं हि चालुक्यराजकन्याऽस्मि। वीराङ्गनासहस्रस्य तप्तरुधिरं वहति मे शिरासु। येन मे तनया निहता देशश्च दासीकृतः तस्य लोहितं पातुम् एकाकिनी अपि समर्थाऽहम्। (अकलङ्कचरितं प्रति) रे नरपिशाच, चाण्डाल, तव शोणितं पीत्वा एव कृतार्था भविष्यामि।

**भिल्लमः**—(आक्रुश्य लक्ष्मीं प्रति) गच्छाव इदानीम्।

**लक्ष्मीः**—किन्तु स्यूनदेशं गच्छावः। अस्यां पापभूमौ पलमात्रमपि स्थातुं नोत्सहे।

**तैलपः**—(सरोषम्) महासामन्त, किम् इयम् अपनीयते वा न वा?

**भिल्लमः**—(लक्ष्मीतैलपयोः मध्ये स्थित्वा) तैलपराज, सत्यमेव उक्तं देव्या। (शङ्खं धमति।) एत, सैनिकाः, स्यूनदेशं गच्छामः। (लक्ष्मीहस्तं गृहीत्वा प्रतिष्ठते।)

**तैलपः**—भिल्लम, किम् एतत् करोषि? अपि त्वमपि उन्मत्तोऽसि?

**भिल्लमः**—(बद्धमुष्टिम् उद्यम्य सकोपम्) किम्?

**तैलपः**—(ईषत् परावृत्य) मान्यखेटनगरात् नैव निर्गन्तुं शक्ष्यसि।

**भिल्लमः**—पश्यामि अधुना को मां प्रतिरुणद्धि इति। [लक्ष्म्या सह निष्क्रान्तः।]

**तैलपः**—अकलङ्क, अपाव्रियतां नगरस्य प्रवेशद्वारम्।



**अकलङ्कचरितः**—यथाऽऽदिशति तातः। [निष्क्रान्तः। मृणालवती अपि गन्तुम् उच्चलति।]

**तैलपः**—(प्रोच्चैः) मृणालवति—[मृणालवती निष्क्रान्ता। आत्मगतम्] हा हतोऽस्मि। सर्वतः प्रतिकूलो हि मे विधिः। वैराग्यशीला मृणालवती तस्य दुरात्मनो वल्लभा भूता। कूटप्रबन्धकारिणः कुमारं पराजित्य पलायिताः। भिल्लमश्च विद्रोहं कृत्वा शत्रुत्वम् आपन्नः। अहो दारुणा मे असहायता। इतःपरं न मृणालवत्याः बुद्धिबलं न वा भिल्लमस्य बाहुबलं मे सहायीभविष्यति। हा सम्मूढं मे मनः। न खलु ज्ञायते किम् अनुष्ठेयम् इति। (इतस्ततः सचिन्तं भ्रमति।)

**अकलङ्कचरितः**—(ससम्भ्रमं प्रविश्य) हा तात, हता वयम्।

**तैलपः**—किं भूतम्?

**अकलङ्कचरितः**—नगरस्य प्रवेशद्वारे अस्मत्सैनिकान् पराजित्य भिल्लमः ससैनिकम् अपसृतो मान्यखेटात्।

**तैलपः**—भवतु। गच्छतु असौ स्वदेशम्। अकलङ्क, इतःपरं मुञ्जाय नैव किमपि अन्नं देयम्। भिक्षापात्रम् आदाय भवनाद् भवनं भ्रमतु यच्च किञ्चित् लभ्येत तेनैव जीविकां करोतु। अनेनैव उपायेन आत्तगर्वः स्यात्। सप्ताहान्ते च हस्तिसात् कृत्वा निहन्तव्यः।

**अकलङ्कचरितः**—यथाऽऽज्ञापयति तातः। (उभौ निष्क्रान्तौ।)

**इति प्रथमः प्रवेशः।**

---

## द्वितीयः प्रवेशः।

**स्थलम्**—मृणालवत्याः मन्दिरम्।
**समयः**—त्रयोदशः दिवसः। सायङ्कालः।
[मृणालवती मञ्चकनिषण्णा विषण्णवदना च दृश्यते।]

**तैलपः**—(प्रविश्य सोपहासम्) भोः तैलङ्गणमातः, कियद् दूरम् अधुना अवन्तिपुरम्? (सकोपम्) आः कुलटे, नियतं साधुतरम् अभविष्यद् यदि तव स्थाने मातुरुदरात् शिला एव समजनिष्यत। (विहस्य)

निष्कलङ्का किल तापसी । अहो वैराग्यम् ! अहो च नीतिमत्ता ! ! त्वया खलु स्वच्छन्दवर्तनेन तैलङ्गणवाराङ्गनाः अपि ह्रेपिताः सन्ति । किं तैलङ्गणेषु न कोऽपि पुरुषः प्राप्तः येन तस्मिन् पापात्मनि बद्धभावाऽसि ?

**मृणालवती**—मुञ्जेन समानः पुरुषः नैव त्रिभुवनेऽपि लभ्यः, किमुत तैलङ्गणेषु ?

**तैलपः**—आः निर्लज्जे, कथं न जिह्रेषि मत्सम्मुखम् एवं भाषमाणा ?

**मृणालवती**—किमिति जिह्रेमि ? न खलु त्वया मे वैराग्यम् अभिज्ञातं न वा अनुरागोऽपि । अलं हि मुञ्जम् उपहस्य । त्वादृशानां दशसहस्रम् अपि तेन तुलाम् अधिरोढुं नालम् ।

**तैलपः**—( सहास्यम् ) साधु साधु तपस्विनि । साधु साधु तैलङ्गणजननि । नूनम् अतिमात्रं शोभसे एवं भाषमाणा ।

**मृणालवती**—शोभे वा न वा तन्न गणयामि । मया हि स्वहस्तेनैव क्षुण्णमस्ति आत्मनो जीवितपुष्पम् । मृतायां मयि न कोऽपि शोकं कुर्यात् । अद्ययावद् उग्रा तापसी इति राज्यविधात्री इति च सर्वेषां सभयादरभाजनं भूता । इतःपरं तु कुलटापदवीं प्राप्य विविधनिन्दास्पदं भविष्यामि । ( किञ्चित् स्तब्ध्वा ) तथापि तापसी इति यं गर्वम् अवहम्, स एव किं बहुना ततोऽपि गरीयान् अभिमानः साम्प्रतं पृथिवीवल्लभस्य वल्लभापदं प्राप्य अनुभूयते मया ।

**तैलपः**—( उच्चैर्विहस्य ) अद्ययावत् माता इव देवता इव वा अभिवादिता त्वम् अचिरादेव मे प्रतापम् आस्वादयिष्यसे ।

**मृणालवती**—कस्त्वं मां प्रतापम् आस्वादयमानः ? अहं मन्दभाग्या हि विधिना एव सर्वम् आस्वादिताऽस्मि ।

**तैलपः**—प्रथमं तावत् ते पृथिवीवल्लभः मे प्रतापम् आस्वादयिष्यते, ततश्च त्वम् ।

**मृणालवती**—निष्फलः तवायम् आरम्भः । स हि नित्यम् आनन्दमेव अनुभवन् आस्ते ।



**तैलपः**—तन्नैव जानासि मे प्रतापम् । [ मृणालवती सावज्ञं हसति । गवाक्षम् उद्घाट्य साङ्गुलिनिर्देशं च ] पश्य, पश्य, अयं ते पृथिवीवल्लभः शृङ्खलाबद्धहस्तः भिक्षापात्रधारी च सैनिकैः परिवृतः सन् भणगवद् भवनाद् भवनं परिभ्रमति । एवं सप्त दिवसान् भैक्ष्येण वृत्तिं कृतवान् एष नराधमः अद्य त्वाम् अन्तिमां भिक्षां याचिष्यते, पश्चाच्च—

**मृणालवती**—पश्चात् किम् ?

**तैलपः**—पश्चाद् अयं चतुष्पथे स्थितः मदोन्मत्तः गजराजः तं यमसदनं प्रेषयिष्यति यत्र त्वं न लप्स्यसे । ( हसति । ) मृणालवति, शृणु इमां तस्य भणगस्य करुणवाणीम् ।

[ नेपथ्यात् मुञ्जस्य कस्याश्चिद् गृहिण्याश्च संवादः श्रूयते । ]

**मुञ्जः**—भवति, मा शुचः । नास्ति किमपि शोककारणम् । यदि एवं न भ्रमामि तर्हि कथं नाम मान्यखेटपुरवासिनां परिचयः प्राप्स्यते ? अपि अस्ति किञ्चिद् अत्रभवत्या गृहे ? यदि स्यात्, दीयताम् ।

**स्त्री**—महाराज, इदानीं तु—

**मुञ्जः**—भद्रे, यत् किञ्चित् स्यात् तदेव दीयताम् । तन्नूनं राजभवने प्राप्येभ्यो मिष्टान्नेभ्यः साधीय एव स्यात् । काः खलु पाकक्रियायां कुशलतराः, मान्यखेटवासिन्यः अवन्तिवासिन्यो वा, इत्येव परीक्षितुकामोऽस्मि । ( किञ्चित् संस्तभ्य ) सुन्दरि, अनुगृहीतोऽस्मि भिक्षादानेन । इदमेव स्मर्यताम्—

**अपैतुं चेत् कान्तः कुसुमकरपाशात् प्रयतते**
**तिरस्कार्यो मूढः स खलु रसहीनो वरतनु ।**
**मृणालं हस्तो वाऽयमिति पृथिवीवल्लभदशा**
**भ्रमाद् भिक्षापात्रे पतितमपि दृष्टं नहि यतः ॥ १ ॥**

**तैलपः**—पश्य, ईदृशस्ते पृथिवीवल्लभः ।

**मृणालवती**—सम्यग् दृष्टो मया अनेकवारम् । त्वमेव साम्प्रतं द्रष्टुमर्हसि । नो चेत्, न पुनः प्राप्स्यते तस्य दर्शनम् । पश्य, अस्यां दुरवस्थायां वर्तमानस्यापि तस्य मुखं यथानित्यं शान्तं सानन्दमेव च दृश्येत । न मनागपि ह्रासमापन्नं स्यात् तस्य गौरवम् । तस्य हस्तगता शृङ्खला भिक्षा-

पात्रं च राजचिह्नशोभाम् एव बिभृयाताम्। यत्सत्यम् अयमेव यथार्थः पृथिवीवल्लभः न च कश्चिदन्यः।

**तैलपः**—भवतु। अचिरादेव तवायं पृथिवीवल्लभः हस्तिनीवल्लभेन पृथिवीमेव प्रापयिष्यते। अकलङ्क—

**अकलङ्कचरितः**—( प्रविश्य ) अयमस्मि।

**तैलपः**—अपि कृता सर्वत्र मुञ्जसम्बद्धा घोषणा ?

**अकलङ्कचरितः**—अथ किम्।

**तैलपः**—अपि समुपस्थिताः पौरजनाः ?

**अकलङ्कचरितः**—बाढम्।

**तैलपः**—तद् इदानीम् आनीयताम् असौ दुरात्मा।

**अकलङ्कचरितः**—यथाऽऽदिशति तातः। [ निष्क्रान्तः। अचिरादेव शृङ्खलाबद्धहस्तः सैनिकाभ्यां सहितश्च मुञ्जः प्रविशति, अकलङ्कचरितश्च। ]

**तैलपः**—मुञ्ज, इदानीं तव इयं वल्लभा तुभ्यम् अन्तिमभिक्षां प्रदास्यति। तां स्वीकृत्य यमराजस्य आतिथ्यं स्वीकर्तुमुद्यतो भव।

**मुञ्जः**—यमराजस्य आतिथ्यं स्वीकर्तुं सदैव सिद्धोऽयं क्षत्रियः यमभयेन मम पादयुग्मं षोडशकृत्वः क्षालितवतः पामराद् उपदेशं नेच्छति।

**तैलपः**—( सक्रोधम् ) किं न अद्यापि नष्टः ते अभिमानः ?

**मुञ्जः**—मूढ, अभिमानं विना नैव क्षणमपि जीवन्ति मानधनाः।

**तैलपः**—भवतु। याचस्व साम्प्रतं प्रियाम् अन्तिमभिक्षाम्।

**मुञ्जः**—मृणालवति, अद्य किं मे प्रदास्यसि ? यतः त्वया सर्वस्वमेव समर्पितपूर्वं मे। ( तां प्ररुदितां दृष्ट्वा ) सुन्दरि, मा मा शुचः। जगत् खलु क्षुद्रम् अज्ञं दुष्टं च वर्तते वर्तिष्यते च नित्यम्। अतः सरसीकृतजीवनया त्वया नैव तस्मात् मनागपि भेतव्यम्। सर्वथा उपेक्षणीयः क्षुद्रजनापवादः।

**मृणालवती**—( सरभसं मुञ्जस्य पादयोः पतित्वा ) हा पृथिवीवल्लभ, क्षमस्व मां क्षुद्रां स्वार्थपरां च। नूनम् अहमेव भवतो मरणकारणम्। ( रोदिति। )

**मुञ्जः**—मा मा एवं, मृणालवति। जातस्यैव मे निश्चित आसीन्मृत्युः। त्वं सर्वथा निर्दोषा एव। तदुत्थीयतां दीयतां च मे आशीः। [ तैलपः सरभसम् उपेत्य मृणालवतीं हस्तेन मुञ्जाद् वियोजयति। ] तैलप, किमिति एषा निरपराधा मद्वैरनिर्यातनस्य आस्पदतां नीयते ?



**तैलपः**—रे चाण्डाल, अवष्टम्भय जिह्वाम्।

**मुञ्जः**—किमिति अहं जिह्वाम् अवष्टम्भयामि ? वस्तुतः त्वमेव सम्प्रति तथा कर्तुम् अर्हसि। यतः सम्पूर्णतां गतोऽस्ति त्वयि मे विजयः !

**तैलपः**—( सोपहासम् ) किं तव मयि विजयः ? ( उच्चैः हसति। )

**मुञ्जः**—मूर्ख, अपि द्रष्टुं क्षमोऽसि ?

**अवन्तिसिंहासनसंस्थितो मे भोजोऽधुना गर्जति सिंहतुल्यः।**
**सुतावधं शोधयितुं च तीव्रं स्यूनाधिपः काङ्क्षति भिल्लमोऽपि ॥२॥**

अन्यच्च—

**तव प्रजाः स्वसा चापि रक्ता हि मयि न त्वयि।**
**केन तर्हि जितं पृथ्वीवल्लभेन त्वयाऽथ वा ? ॥ ३ ॥**

**तैलपः**—अचिरेणैव मे गजराजो दर्शयिष्यति कीदृश : ते विजय इति।

**मुञ्जः**—( विहस्य ) किं तेन मम विजयः साधितः स्यात् तव वा ? त्वया हि मां नमयितुकामेन ते ते प्रयत्नाः विहिताः। तथाऽपि अनतमस्तक एव जीवनयात्रां समापयिष्यामि। त्वं तु नीतिमत्तायाः वृथाभिमानं वहन्नपि राजवधपापेन कलङ्कितः स्याः। तत् केन जितं, मया वा त्वया वा ?

**तलपः**—सैनिकौ, गृह्यताम् अयम्।

**मुञ्जः**—किं ग्रहणेन ? अयं स्वयमेव गजराजम् उपसर्पामि। ( कानिचित् पदानि गत्वा परावृत्य ) पश्य तैलप, पृथिवीवल्लभस्य अनुरूपमेव मरणम् अधिगच्छामि। [ द्वारे तिष्ठति। )

**तलपः**—मुञ्ज, किं स्तब्धः ? अपि भीतोऽसि ?

**मुञ्जः**—( विहस्य ) अथ पृथिवीवल्लभो बिभीयात् तदा खलु रसातलं यायात् पृथिवी। मूर्ख, नाहं भयेन किन्तु एकेन विचारेण स्तम्भितोऽस्मि।

**तैलपः**—विचारः ? को विचारः ?

**मुञ्जः**—मयि दिवं गते अनाथायाः सरस्वत्याः का स्थितिर्भवेत् इति अनेनैव विचारेण स्तम्भितोऽहम्।

लक्ष्मीर्यास्यति गोविन्दे वीरश्रीर्वीरवेश्मनि ।
गते मुञ्जे यशःपुञ्जे निरालम्बा सरस्वती ॥ ४ ॥

तैलपः—अपि अस्ति काचित् ते अन्तिमस्पृहा ?

मुञ्जः—का नाम अन्तिमस्पृहा निःस्पृहस्य मे ? तथाऽपि एवमस्तु—

भूपालाः सकलाः कलारसविदः स्नेहान्महीं शासतु
सङ्गीतादिकलासरिद्भिरनिशं मुक्तं भुवि स्रूयताम् ।
सानन्दं सरसं च तिष्ठतु सदा लोके प्रजाजीवनं
सङ्क्षेपादथवाऽवरोहतु धरां साक्षादमर्त्यालयः ॥ ५ ॥

(द्वारे स्थित्वा) अयि कुञ्जरराज, अयं राजकुञ्जरः पृथिवीवल्लभः त्वाम् उपैति ।

दन्तिराज कुरु ताण्डवनृत्यं
मस्तके मम स दन्तिपितेव ।
आशु मां च नय तत्पदयुग्मं
निर्वृतेर्जगति यत्पदमेकम् ॥ ६ ॥

[निष्क्रान्तः । सैनिकौ अपि निष्क्रान्तौ । सपदि एव नेपथ्यात् कोलाहलः श्रूयते । 'जयतु महाकालः' इति मुञ्जकृतः घोषः त्रिवारं श्रूयते ततश्च जनैः कृतः हाहाकारः ।]

मृणालवती—हा पृथिवीवल्लभ, हा पृथिवीवल्लभ-(इति आक्रुश्य मूर्च्छिता भूत्वा भूमौ निपतति ।)

इति पृथिवीवल्लभम् ।

---

## 'पृथिवीवल्लभ' नाटक-सहायक-कलाकार-सूची ।

| | | | |
|---|---|---|---|
| १ | मूलकथा-लेखकः | — | श्री. कन्हैयालाल मुनशी |
| २ | संस्कृत-नाटक-लेखकः | — | श्री. बा. का. लिमये |
| ३ | निर्माता | — | श्री. प्रभाकरपन्त जोशी |
| ४ | दिग्दर्शकः | — | श्री. दाजी भाटवडेकर |
| ५ | सहायक-दिग्दर्शकः | — | श्री. राम बापट |
| ६ | सङ्गीत-दिग्दर्शकः | — | श्री. गङ्गाधरपन्त गोखले |
| ७ | रङ्गभूषाकारः | — | श्री. नाना जोगलेकर (मेक अप् सर्व्हिस) |
| ८ | वेषभूषाकारः | — | श्री. मगनलाल ड्रेसवाला (भुलेश्वर) |
| ९ | छायाचित्रकारः | — | श्री. राजदत्त |
| १० | नेपथ्य-योजकः | — | भारतीय-विद्या-भवन-कला-केन्द्र |
| ११ | वाद्यवादकौ | — | सर्वश्री माधव कुण्डले, आत्माराम थत्ते |
| १२ | ध्वनियन्त्र-नियन्त्रकः | — | श्री. किसन सहस्रबुद्धे |
| १३ | रङ्गमञ्चव्यवस्थापकाः | — | सर्वश्री दादा खिरे, सौ. शकुन्तला जोशी इत्यादयः । |

## वर्णानुक्रमेण पृथिवीवल्लभ-नाटक-श्लोक-सूची ।


| क्रमाङ्कः | श्लोकारम्भः | पृष्ठाङ्कः | क्रमाङ्कः | श्लोकारम्भः | पृष्ठाङ्कः |
|---|---|---|---|---|---|
| १ | अचलसदृशी | १५ | २६ | प्रक्षाल्य पादयुग्मं | ४० |
| २ | अपैतुं चेत् कान्तः | ६३ | २७ | प्राणसमानेऽस्माकं | ३५ |
| ३ | अवन्तिसिंहासन | ६५ | २८ | भवेदत्यन्तविक्रान्तो | ४ |
| ४ | आकर्ण्य यस्य | ३९ | २९ | भुक्तं कामं सुखम् | २७ |
| ५ | इन्द्रियाणां नियमने | ३ | ३० | भूत्वा भाग्यवती | २० |
| ६ | कामक्रोधप्रभृति | ३ | ३१ | भूपालाः सकलाः | ६६ |
| ७ | कामक्रोधादिनिर्मुक्तं | ४,३० | ३२ | महादेवं महाकालं | ३९ |
| ८ | ग्रीवा च पुष्टदीर्घा | १३ | ३३ | मान्यखेटपुरे शुष्के | १८ |
| ९ | घृष्टं दमशिलाखण्डे | २ | ३४ | यदिच्छया मन्ददरो | ४२ |
| १० | जयतु जयतु देवः | ३८ | ३५ | यस्य प्रभावाद् | ४२ |
| ११ | जयन्तु नृत्यन्तु | ४ | ३६ | यस्य प्रसादादिह | ४२ |
| १२ | जातस्त्यक्तो जनन्या | २७ | ३७ | यावन्नो जीवनाधारो | ३४ |
| १३ | तव प्रजाः स्वसा | ६५ | ३८ | येन प्रदत्तं सकलं | ४२ |
| १४ | तस्यास्ति किं | ११ | ३९ | लक्ष्मीर्यास्यति | ६६ |
| १५ | ताण्डवेन भुवनं | ४० | ४० | विजयं देहि साधुभ्यः | ४ |
| १६ | तैलप नृप तव | २२ | ४१ | विरहशोकविवर्जन | ३२ |
| १७ | त्यक्तं सुखं | २ | ४२ | शते समानां जगति | ११ |
| १८ | दन्तिराज कुरु | ६६ | ४३ | शीघ्रं भवाञ्जनमिमं | ६० |
| १९ | धुन्वन्तौ सकलां | ४० | ४४ | शोभामस्य मुखस्य | १३ |
| २० | न पाषाणभित्तिः | ४७ | ४५ | सम्राडुत्तरभारतस्य | १ |
| २१ | निखिलगुणिजनानाम् | ३९ | ४६ | सहस्रहस्तोऽपि | ३५ |
| २२ | नैका वशीकृता मे | २७ | ४७ | सुखं न शिष्टं | ४२ |
| २३ | नैव लोकत्रये | ४८ | ४८ | सृष्टेरन्तकरोऽपि | १ |
| २४ | पश्चात् क्षिप्तं च | १३ | ४९ | संवूर्यतां सुधानाथः | २० |
| २५ | पृथिवीवल्लभाभावात् | १९ | ५० | स्वर्गे वा नरके वा स्यां | २५ |


## वर्णानुक्रमेण पृथिवीवल्लभ-नाटक-सूक्ति-सूची ।


| क्रमाङ्कः | सूक्तिः | पृष्ठाङ्कः |
|---|---|---|
| १ | अनियतः सुखभोगः पौरुषनाशायैव भवति । | १४ |
| २ | अपरिहार्य एव मातृवियोगो वनिताजनस्य । | ५६ |
| ३ | अपि जातु सिंहमिथुनं लज्जितमवलोकितम् ! | ४५ |
| ४ | अभिजातवीर एव वीरान्तरगुणवर्णनं कर्तुमलम् । | ७ |
| ५ | अभिमानं विना नैव क्षणमपि जीवन्ति मानधनाः । | ६४ |
| ६ | अस्मिन् संसारे शान्तिं वर्जयित्वा चञ्चलमेव सर्वम् । | २१ |
| ७ | अहङ्कार एव मूलं सकलपापानाम् । | ११ |
| ८ | आनन्द एव परमार्थतो निश्चलः । | २१ |
| ९ | आनन्दमयः खलु परमेश्वरः । | ४४ |
| १० | आनन्दसमाधिमनुभवन् न कदापि कलङ्कितो भवति । | ४४ |
| ११ | इन्द्रियाणां नियमने वृद्धा एव क्षमा इति ।<br>पामरा एव जल्पन्ति लुब्यन्तो भोगकर्दमे ॥ | ३ |
| १२ | कलङ्को हि पापिन एव सम्भवति निर्बलस्यैव च तपोभङ्गः । | ४४ |
| १३ | गर्वितस्य गर्वहरणमेव मरणाधिकम् । | १५ |
| १४ | जगत् खलु क्षुद्रमज्ञं दुष्टं च वर्तते वर्तिष्यते च । | ६४ |
| १५ | दुःखितः अपूर्ण एव वा उपदेशमर्हति । | २६ |
| १६ | दृढनिश्चयः खलु किं न साधयितुं समर्थः ? | ३ |
| १७ | देवा अपि आनन्दमूर्तयः । | २१ |
| १८ | न खलु युक्तो दुःखितानां परिहासः । | १८ |
| १९ | न पाषाणभित्तिर्न वा लोहदण्डा निरोद्धुं समर्था अनङ्गं कदाचित् । | ४७ |
| २० | नहि कामदेवं निरोद्धुमलं कारागारम् । | ४७ |
| २१ | नहि कारागारस्य अन्धकारः कामदेवस्य परिपन्थीभवति । | ४८ |
| २२ | नहि सूर्यादमृतनिष्यन्दो भवति । | १९ |
| २३ | नैव लोकत्रये किञ्चित् स्थानं समुपलभ्यते ।<br>प्रभवन्ति न यत् प्राप्तुं पञ्चबाणस्य पत्रिणः ॥ | ४८ |
| २४ | परजनमित्रभावात् स्वजनसेवाऽपि श्रेयसी । | ३२ |

२५ मानवविजयाद् आत्मविजयः श्रेयान्। ४
२६ मानवस्य महिमा शीलायत्तः न रूपायत्तः। ११
२७ मूर्खैरेव रूपं बहु मन्यते। ११
२८ यत्सत्यम् आनन्दे अरुचिरेव रोगः। ४४
२९ या सुखं ददाति तस्या अर्थे दुःखसहनमपि सुखायैव कल्पते। ३३
३० यो हि स्नेहं जानाति स एव विरहं जानीयात्। ३३
३१ वयः खलु मनस्येव समायत्तम्। ४५
३२ वरं प्राणत्यागो न तु प्रियावचनभङ्गः। ४८
३३ शब्दधनाः किल कवयः। १९
३४ सर्वथा उपेक्षणीयः क्षुद्रजनापवादः। ६४
३५ साधारणं मानववर्ष्म लोके। ११
३६ सुखं नाम न केवलो दुःखाभावः न वा सन्तोषः। ३३
३७ सुखं नाम शरीरमनसोः सकलभावोर्मीणां मुक्तनृत्यम्। ३३

---

## शुद्धिपत्रम्।

| पृष्ठाङ्कः | अशुद्धम् | | शुद्धम् |
|---|---|---|---|
| १३ | भापयतीव | — | भाययतीव |
| १५ | काष्ठपञ्जरः | — | काष्ठपञ्जरम् |
| ५९ | वलिभलला्टः | — | सभ्रूभङ्गः |
| ६३ | मृणालं हस्तो वा | — | करो वा नालो वा |

---

## वर्णानुक्रमेण 'पृथिवीवल्लभ' गत-कठिन-शब्दार्थ-सूची।

१ अधृष्णोत्-साहसम् अकरोत्।
२ अनुततम-पश्चात्तापयुक्तम्।
३ अनुरुध्येथाः-अनुसरेः।
४ अनुष्ठेयम्-कर्तव्यम्।
५ अनूना-न अल्पतरा।
६ अन्तरायः-विघ्नः।
७ अन्तरितैः-निगूढैः।
८ अन्तरेण-उद्दिश्य।
९ अभिमतः-प्रियः।
१० अभिसारिका-प्रेयसी।
११ अमर्त्यालयः-स्वर्गः।
१२ अलातः प्रज्वलितवह्निशिखा-युक्तो दण्डः।
१३ अवरम्-हीनम्।
१४ अवसि-रक्षसि।
१५ अवसितम्-समाप्तम्।
१६ अवाङ्मुखः-नतमस्तकः।
१७ आत्तगर्वः-हृतगर्वः।
१८ आनृण्यम्-ऋणमुक्तता।
१९ आपृच्छे-गमनानुज्ञां याचे।
२० आयतौ-भविष्यत्काले।
२१ उपालम्भः-निर्भर्त्सना।
२२ कपटप्रबन्धः-गुप्तयोजना।
२३ कलत्राणि-भार्याः।
२४ कवलितौ-भक्षितौ।
२५ कार्तवीर्यः-सहस्रार्जुनः।
२६ कार्श्यम् कृशत्वम्।
२७ कैशिकम्-केशसमूहः।
२८ क्रतुध्वंसी-दक्षयज्ञविध्वंसकः।
२९ क्षपितम्-विनाशितम्।
३० चतुष्पथे-मार्गद्वयसङ्गमस्थाने।
३१ जातु-कदाचित्।
३२ तावकीनात्-त्वदीयात्।
३३ दण्डधरादृते-यमाद् विना।
३४ दन्तिराज-गजश्रेष्ठ।
३५ दरीदृश्यते-पुनः पुनर् दृश्यते।
३६ द्युतिविकलताम्-निष्प्रभताम्।
३७ नालः-कमलदण्डः।
३८ निकायः-राशिः।
३९ निरपत्रपः-निर्लज्जः।
४० निरये-नरके।
४१ निरालम्बा-निराधारा।
४२ निर्वर्ण्य-निरीक्षणं कृत्वा।
४३ निर्विश्यताम्-उपभुज्यताम्।
४४ निषण्णा-उपविष्टा।
४५ निष्यन्दः-स्रावः।
४६ पञ्चबाणः-कामदेवः।
४७ पत्रिणः-बाणाः।
४८ पराकृष्टा-पश्चाद् आकृष्टा।
४९ परिणंस्यति-परिणतं भविष्यति।
५० परिपन्थीभवितुम्-विघ्नं कर्तुम्।
५१ परिभवः-अपमानः।
५२ परिशोधितः-प्रत्यपकारः कृतः।
५३ परिष्वज्य-अलिङ्ग्य।

५४ परिहीयेत–नष्टं भवेत् ।
५५ पादोनशत–पञ्चसप्तति ।
५६ पारयामि–शक्नोमि ।
५७ पिनाकपाणिः–शङ्करः ।
५८ पीवरम्–पुष्टम् ।
५९ प्रणयः–अभ्यर्थना ।
६० प्रतिफलम्–पारितोषिकम् ।
६१ प्रतिश्रुतम्–वचनं दत्तम् ।
६२ प्रतिहिंसा–प्रत्यपकारः ।
६३ प्रत्याख्यायताम्–'न' इति उच्यताम् ।
६४ प्रमत्ता–च्युता ।
६५ प्रासः–शस्त्रविशेषः ।
६६ भासुरम्–तेजस्वि ।
६७ मन्ददरः–गतभयः ।
६८ मरुस्थली–वालुकामयः प्रदेशः ।
६९ मलीमसः–मलिनः ।
७० महिषी–मुख्या राज्ञी ।
७१ लूनम्–छिन्नम् ।
७२ वर्ष्म–शरीरम् ।
७३ वलिरहितः–अशिथिलचर्मा ।
७४ विद्रुतः–पलायितः ।
७५ विनिपातः–अधःपातः ।
७६ विरलमेव–क्वचिदेव ।
७७ विश्वम्भरया–पृथिव्या ।
७८ वीजितः–पवनदानेन सन्तोषितः ।
७९ वैरनिर्यातनम्–अपकारकर्तुः प्रत्यपकारः ।
८० व्यतरम्–अयच्छम् ।
८१ शतपाद्–पञ्चविंशति ।
८२ शर्मधाम्नः–आनन्दस्थानस्य ।
८३ शिरोरुहाः–केशाः ।
८४ श्यामायतम्–कृष्णं दीर्घं च ।
८५ श्रुते–ज्ञाने ।
८६ सनिर्बन्धम्–साग्रहम् ।
८७ सन्निकर्षे–समीपे ।
८८ समत्वम्–स्थिरत्वम् ।
८९ समाः–वर्षाणि ।
९० सम्भावितम्–मानयुक्तम् ।
९१ सहोदरम्–बन्धुम् ।
९२ संहृताः–दूरीकृताः ।
९३ साधीयः–साधुतरम् ।
९४ साभ्यसूयः–मत्सरग्रस्तः ।
९५ सावज्ञम्–तिरस्कारेण सह ।
९६ सुरङ्गामार्गः–भूमिगर्भगतः मार्गः ।
९७ सुषमाम्–शोभाम् ।
९८ सुसंवादः–स्नेहयुक्तः सम्बन्धः ।
९९ स्वान्ते–चित्ते ।
१०० ह्रेपिता–लज्जां प्रापिता ।

भारतीय विद्या भवन

अमृतं तु विद्या

मुंबई